THE
RITUSAMHARA
OF
KALIDASA

WITH A NEW COMMENTARY BY

SHASTRI VYANKATACHARYA UPADHYE,

OF BARODA COLLEGE

AND

INTRODUCTION, NOTES AND TRANSLATION BY

M. R. KALE, B. A.,

Author of 'A Higher Sanskrit Grammar' &c

FIRST EDITION.

VAMAN YASHWANT & Co.,

GIRGAON, BOMBAY.

1916.

Price One Rupee.

PREFACE.

In preparing the present edition of the *Ritusaṃhára* the particular requirements of University students have been kept in view; but it is hoped that nothing that is of interest to the general reader has been omitted. The Bombay text in six Cantos and 144 verses has been adopted as being the one most generally received; all extra verses found in Mss. and printed copies have been thrown together is an appendix at the end. In settling the text I have chosen what readings seemed to suit best; the frequent discussions about variants given in the notes may serve to induce in the student a habit of thinking for himself. The notes had to be done independently of the com., as the edition was undertaken in April last on the Śàstri's intimating to me that he would be able to begin and finish the com. in May and not earlier than that; and yet I trust no serious discrepancies have been allowed to remain between the com. and the notes. A full index of the more important words in the text has been added at the end. I am very sorry to see that some misprints have disfigured the book owing to the proofs of the notes and the com. being corrected different times and places.

I have used the editions of K. R. Godbole, Mr. S. S. Ayyar and the Nirn. edition with com. and notes, and to the editors of all these my thanks are due. I am also greatly obliged to a friend of mine who materially assisted me in the preparation of this edition, and also corrected the proof-sheets.

BOMBAY,
June 1916. } M. R. KALE.

INTRODUCTION.

I.

In Sanskrit literary history there have been many poets who were known as Kâlidâsa and at least three were known to Râjas'ekhara who wrote–

एकोऽपि जीयते हन्त कालिदासो न केनचित् ।
शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु ॥ १ ॥

By *ekah* of course is meant Ka'lida'sa, the author of Abhijna'nas'akuntala, Raghuwamsa, etc., and it is him we are here concerned with. Of his personal history very little is definitely known. The name itself signifies 'a servant of the goddess Durga' it is probable that like so many other names it was bestowed without any reference to its original signification. But on it is based a tradition which represents him to have been an illiterate person, till by the favour of the goddess he suddenly found himself endowed with the poetic gift. Ka'lida'sa is curiously reticent about himself in his works; nor are any records of him by other hands now available. Whatever we can say about his life is based on external and secondary sources and must necessarily remain a matter of more or less guess-work. His birth-place was probably somewhere in Mâlwa and from his glowing description of Ujjayini it would appear that he was a resident of that city. Legends are current about his having been a court-poet of King Vikramaditya, (a matter to which we shall refer further on); and his works, it is true, show considerable acquaintance with court life. He was a Bra'hmana by caste and a devout worshipper of Siva, though by no means a narrow-minded sectarian. He seems to have travelled a great deal throughout India; his graphic description of the Himalayan scenes reads very much like that of an eye-witness. His works bear

testimony to his considerable acquaintance with the Vedas, the philosophy of the Upanishads, the Pura'nas, medicine and astronomy. Altogether he must have been a person of high culture, liberal ideas and unpretentious learning. About his poetry no greater testimony can be quoted than that of Ba'na, the famous master of Sanskrit prose—

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ॥
प्रीतिर्मधुरसार्द्रासु (सान्द्रासु) मञ्जरीष्विव जायते ॥ १ ॥

II.

The problem of the date of the author of *Raghuvamsa* is a much-discussed one, and the last word has yet to be said in the matter. Tradition describes him as one of the 'nine gems' at the court of king Vikrama'ditya. Now, various kings in the history of ancient India called themselves by the title of 'The sun of Valour.' One of these is the supposed founder of the *Samvat* era, commencing with 56 B. C and Ka'lida'sa with greater probability must be placed in his time; the late Dr. Peterson also held the same view when he wrote, " Ka'lida'sa stands near the beginning of the Christian Era, if, indeed, he does not overtop it ". For this view see our Introduction to Sa'kuntala.

But many modern scholars find themselves unable to agree with this view; it is now more generally accepted that Ka'lida'sa must have flourished under one or more of the Gupta Kings. The Gupta period (about 300-650 A. D.) was famous in the ancient history of India for its revival of Sanskrit learning and arts. Mr. Vincent A. Smith in his '*The Early History of India* (3rd Ed. 1914) believes that Ka'lida'sa must have flourished in the reigns of one or more of these Gupta kings-

Chandragupta II. (C. 357-413)
Kuma'ragupta I. (413-455)
Skandagupta (455c-480).

Both Chandragupta II and Skandagupta had adopted the title *Vikramaditya*. Mr. Smith says: " It is not unlikely that the earliest works of Ka'lida'sa, namely, the *Ritusamha'ra* (if that be his), and the *Meghaduta*, may have heen composed before A. D. 413, that is to say, while Chandragupta II was on the throne, but I am inclined to regard the reign of Kuma'ragupta I (413-455) as the time during wich the poet's later works were composed, and it seems possible, or even probable that the whole of this literary career fell within the limits of that reign. It is also possible that he may have continued writing after the accession of Skandagupta. " Mr. Smith thus makes Ka'lida'sa's literary career extend over a period of not less than thirty years. There is thus nothing wrong in the tradition about *Vikrama'ditya* being our poet's patron; only we must arrive at an understanding as to which Vikrama'ditya he was.

III.

Among the works which are now definitely believed to have been Kalidasa's are the three dramas, *Ma'lavika'gnimitra, Vikramorvasiya* and *Abhijnanasa'kuntala* and the three poems, *Meghaduta, Kuma'rasambhava.* (I–VIII) and *Raghuvamsa* (Cantos IX—XVII of the *Kumarasambhava* are believed not to be his, and about *Ritusamha'ra* too there is a difference of opinion.) Kshemendra, the Kâshmirian poet and rhetorician quotes a stanza from a work called *Kuntesvaradautya* of Kâlida'sa, but of this nothing further is known. The following is a list of works which have been attributed to Ka'lida'sa, from time to time:—अम्बास्तव, कालीस्तोत्र, काव्यनाटकालंकारः (?), गङ्गाष्टक, घटकर्पर, चाण्डिकादण्डकस्तोत्र, ज्योतिर्विदाभरण, दुर्घटकाव्य, नलोदय, नवरत्नमाला, पुष्पबाणविलास, मङ्गलाष्टक, रत्नकोश, राक्षसकाव्य, लघुस्तव, विद्वाद्विनोदकाव्य, वृन्दावनकाव्य शृंगारतिलक, शृंगारसार, श्यामलादण्डक श्रुतबोध and सेतुबन्ध or रामसेतु or रावणवध. The authorship of many of these is doubtful and certainly none belong to the author of the *Raghuvamsa.*

IV.

Ka'vya or composition, according to Sanskrit writers, is of two kinds, श्रव्य and दृश्य (dramatic compositions). Of these श्रव्य is either pure prose, or pure poetry or a mixture of the two. Pure poetry, or पद्य, may be either a महाकाव्य (like Raghuvamsa and *Kira'ta'rjuniya*) or a खण्डकाव्य; and they define खण्डकाव्य (lit. *a small poem*) as काव्यस्य एकदेशानुसारी (S. D. VI. 329); the *Meghaduta* and the *Ritusamha'ra* are ka'vyas of this class.

The *khanda kavya* is the nearest approach to a sustained *lyrical* poem in Sanskrit although fugitive stanzas of great lyrical power have always had greater vogue. The Sanskrit lyric may be divided, according to its subject, into two kinds, the religious and the erotic. The numerous extant *Stotras* represent the modern form of the religious type of *khanda ka'vya*. The erotic lyric which is the more popular of the two, may be said to commence, for us, with the poems of Kâlida'sa.

The two prominent characteristics of these short pieces are Nature and Love, which are very often blended together with great facility and grace. Of Nature the poet is observant of mountains, plants and the animal world; of flowers the lotus is the most conspicuous; and of birds we may mention the *cha'taka*, the *chakora* the *kokila*,, and the *chakrava'ka*. Scenes are depicted " brilliant with blossoming trees, fragant with flowers, gay with the plumage and vocal with the song of birds, diversified with lotus ponds steeped in tropical sunshine and with large-eyed gazelles reclining in the shade ' (Prof. Macdonell)

The bulk of this poetry consists of miniature painting depicting amatory situation or sentiment. This portraiture, sometimes effected with exquisite subtlety and charm, also often becomes conventional, especially in the hands of the later poets. The love of Sanskrit poets, it may also

be remarked, is not so much romantic or ethereal as sensuous, though, rarely, they do raise it to a spiritual ideal.

The age of Ka'vya literature may roughly be given as 300-1100 A. D., though later poets now and then cultivated it with remarkable success. The *Meghaduta* of Ka'lida'sa is undoubtedly the ' crest-jewel ' of Khanda ka'vyas; the other work of the same class by that poet is the *Ritusamha'"a* in six cantos, which is a poetical description of the six seasons into which the Hindu year is divided.

Among other specimens the more prominent are: (1) घटकर्पर, a small work of 22 stanzas in which यमक is freely employed: (2) चौरपञ्चाशिका in 50 stanzas, descriptive of various amorous situations; (3) the शृंगारशतक, one of the trilogy which Bhartrihari is said to have composed; (4) the शृंगारतिलक, which is sometimes attributed to Ka'lidas; (5) अमरुशतक, evidently the work of one who is a master in his especial art; (6) the सप्तशतक, which has not attracted much attention owing to its being written in Prakrit, but which is a rich store-house of lyrical verse; (7) the सूर्यशतक in praise of the sun; and (8) the गीतगोविन्द the famous dramatic-lyric of जयदेव. Of later authors perhaps none is superior to Jagan-na'tha Pandita, who in his *Bha'minivila'sa* approached in style and matter the works of older writers.

V.

The Ritusamha'ra (also called in some Mss. *Ritusama'ha'ra* is a description of the six Hindu seasons, ग्रीष्म, वर्षा, शरद्, हेमन्त, शिशिर and वसन्त, in 144 stanzas of various metres. Scholars are at variance as to the justification of its claim to be regarded as the work of the same Ka'lida'sa who wrote the *Raghuvamsa*. It is written in a style which falls far below the level of his other works. There is not the same ease of expression or the same wealth of observation. It is ill put together, rude and full of tame repetitions. And this doubt about its authorship is further strengthened by the fact

that Mallina'tha, who has written commentaries on the Raghuvamsa, Kuma'rasambhava and Meghaduta, did not recognise any fourth poem by the same author. He writes in his introduction to his Sangîvinî on the Rughuvamsa—

मल्लिनाथकविः सोऽयं मन्दात्मानुजिघृक्षया ॥
व्याचष्टे कालिदासीयं काव्यत्रयमनाकुलम् ॥

The testimony of such a great scholar as Mallina'tha is valuable though by itself alone it cannot be called conclusive evidence. For Vallabhadeva, the compiler of the Subha'shita'vali, quotes four stanzas from our book, two of which he distinctly assigns to Ka'lida'sa, though the other two are quoted anonymously. Under the circumstances one can only say that, if not the work of some later author bearing the same name, it must have been written by Ka'lida'sa when very young, in fact it must be his earliest work. The question is still an open one.

The Ritusamha'ra is alone of its kind in Sanskrit poetical literature. Descriptions of seasons abound in Kàvyas, but this is the only poem devoted solely to them. It suffers both in matter and manner from the finished works of other poets and from other works of Ka'lida'sa. In the *Raghuvamsa*, for example, (IV. 14–24, IX. 24–47, XVI. 43–53, XIX. 37–46) there are stanzas of immutable beauty and melodious flow with which very few in this book could stand comparison. Place again,

ईषद्बद्धरजःकणाग्रकपिशा चूते नवा मञ्जरी
मुग्धत्वस्य च यौवनस्य च सखे मध्ये मधुश्रीः स्थिताः ॥
(Vik. II. 7.)

or the vivid touches in

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्या ।

(Megh. I. 24)

side by side with

ताम्रप्रवालस्तवकावनम्राचूतद्रुमाः पुष्पितचारुशाखाः ।
कुर्वन्ति कामं पवनावधूताः पर्युत्सुकं मानसमङ्गनानाम् ॥

(Rit. VI. 15),

or with the elaborate fancies of

मुदित इव कदम्बैर्जातपुष्पैः समन्ता-
त्पवनचलितशाखैः शाखिभिर्नृत्यतीव ॥
हसितमिव विधत्ते सूचिभिः केतकीनां etc. (Rit. II. 23)

Owing probably to want of acute observation and lovely imagination the poet has repeated very often the same thoughts in almost the same words even to the verge of tiresomeness. Compare:—

प्रचण्ड सूर्यः (i. 1)	प्रचण्डसूर्यातपतापिता मही (i. 10)
नितम्बबिम्बैः सदुकूलमेखलैः (i. 4)	नितम्बदेशाश्च सहेममेखलाः (i. 6)
स्तनैः सहाराभरणैः सचन्दनैः (i. 4)	पयोधराश्चन्दनपङ्कशीतलाः (i. 6)
विमुच्य वासांसि गुरूणि सांप्रतम् (i. 7)	गुरूणि वासांसि विहाय तूर्णं (vi. 13)
स्तनेषु तन्वंशुकमुन्नतस्तना निवेशयन्ति प्रमदाः सयौवनाः (i. 7)	तन्वंशुकैः कुङ्कुमरागगौरै— रलंक्रियन्ते स्तनमण्डलानि (vi 4)
गभस्तिभिर्भानुमतोऽभितापिताः (i.15)	रवेर्मयूखैरभितापितो भृशं (i.17)
विलोलजिव्हः (i. 14)	विलोलजिह्वाद्वय (i. 20)
नितान्तनीलोत्पलपत्रकान्तिभिः(ii.2)	कुवलयदलनीलैः (ii. 22)
स्तनैः सहारैः (ii. 18)	दधति वरकुचाग्रैरुन्नतैर्हारयष्टिं(ii.25)
विकचपद्ममनोज्ञवक्त्रा (iii. 1)	विकचकमलवक्त्रा (iii. 26)
तत्संगमादधिकशीतलतामुपेतः (iii. 15)	शरदि कुमुदसंगाद्वायवो वान्ति शीताः (iii. 22)
चन्द्रतारावकीर्णम् (iii. 21)	व्योम ताराविचित्रम् (iii. 26)
न बाहुयुग्मेषु विलासिनीनां प्रयान्ति संगं वलयांगदानि (iv. 3)	भुजेषु संगं वलयांगदानि (vi. 6)
दन्तच्छदं...दन्ताग्रभिन्नम् (iv. 13)	अधरकिसलयाग्रं दन्तभिन्नं स्पृशन्त्यः (vi. 15)

स्रस्तांसदेशलुलिताकुलकेशपाशा (iv. 14)	अंससंसक्तकेशः (v 13)
मन्दानिलाकुलितनम्रमृदुप्रवालाः (v. 17)	आकम्पयन्कुसुमिताः सहकारशाखाः (vi. 22)
पुंस्कोकिलैः कलवचोभिरुपात्तहर्षैः	मासे मधौ मधुरकोकिलभृंगनादैः (vi. 25)
कूजद्भिरुन्मदकलानि वचांसि भृंगैः (vi. 4)	समदमधुकराणां कोकिलानां च नादैः (vi. 27)
बहुगुणरमणीयः कामिनीचित्तहारी (ii. 28)	बहुगुणरमणीयो योषितां चित्तहारी (iv. 18)
अशनिशब्दमर्दलः (ii. 1)	बलाहकाश्चाशनिशब्दमर्दलाः (ii. 4)
प्रवृत्तनृत्यं कुलमद्य बर्हिणाम् (ii. 6)	प्रवृत्तनृत्यैः शिखिभिः समाकुलाः (ii.16)
तोयभरावलम्बिनः (ii. 3)	तोयभरावलम्बिनः (ii. 19)
प्रयान्ति मन्दं (ii. 3)	मन्दमन्दं चलद्भिः (ii. 22)
अधररुचिरशोभां बन्धुजीवे प्रियाणां (iii. 24)	बन्धूककान्तिमधरेषु मनोहरेषु (iii. 25)
पदाम्बुजानि (iv. 4)	अम्बुजकान्तिभाञ्जि (vi. 4)
सोन्मादहंसमिथुनैरुपशोभितानि स्वच्छप्रफुल्लकमलोत्पलभूषितानि उत्कण्ठयन्ति सहसा हृदयं सरांसि (iii.11)	प्रफुल्लनीलोत्पलशोभितानि सोन्मादकादम्बविभूषितानि सरांसि चेतांसि हरन्ति पुंसाम् (iv. 9)
मनोहरक्रौञ्चनिनादितानि (iv. 8)	क्वचित्स्थितक्रौञ्चनिनादराजितम् (v. 1)
शुचौ प्रिये यान्ति जनस्य सेव्यताम् (i.2)	प्रयान्ति कालेऽत्र जनस्य सेव्यताम् (v. 2)
पुष्पासवामोदसुगन्धिवक्त्र (v. 10)	पुष्पासवामोदितवक्त्रपङ्कजाः (v. 5)
काचिद्विभूषयति दर्पणसक्तहस्ता बालातपेषु वनिता वदनारविन्दम् (iv. 13)	सवितुरुदयकाले भूषयन्त्याननानि (v.15)
खेदं गताः प्रशिथिलीकृतगात्रयष्टयः	कंदर्पदर्पशिथिलीकृतगात्रयष्टयः (vi. 24)

This list, though a long one, is by no means exhaustive and the reader will find many more similar instances. This paucity of ideas makes the work sometimes lack in coherence. Stanzas of real poetic beauty and power (*e. g.* VI. 10, IV. 10, V. 25, III. 16, III. 7. II. 13, I. 22–27) are comparatively few. We are thus surprised to see Prof. Macdonell praising it thus in unqualified terms. "Perhaps no other work of Ka'lida'sa's manifests so strikingly the poet's deep sympathy with Nature, his keen powers of observation, and his skill in depicting an Indian landscape in vivid colours." We rather think that the *Ritusamhara* has nothing to be compared with the passages from *the Raghuvamsa* (quoted above) or *Kuma'rasambhava* (III. 25–29), and one is more inclined to agree with Prof. Ryder who says: " *The seasons* would neither add greatly to his (Ka'lida'sa's) reputation nor subtract from it. "

VII.

Only two old commentaries on the *Ritusamhára* have been discovered. One is called *Chandrika'* and was composed by Manira'ma, son of Nîlakantha, in Samvat 1814; it has been printed at Calcutta and Bombay. This is a very meagre commentary, without any attempt at a critical understanding of many places. The other commentary is by one अमरकीर्ति and is known only in one Ms. in a fragmentary condition. The Ritusamha'ra, by the way, has the distinction of being the first Sanskrit text of which an edition was printed. (Calcutta, 1792). The student may advantageously read the collections of stanzas descriptive of the various seasons, in the *Subha'shita'vali*, in the *Sa'rngadharpaddhati*, and particularly in that recent useful compilation, the *Subhas'hitaratnabha'nda'ga'ra* of K. P. Parab, published by the Nirnayasagara Press. Stray descriptions will also be found in every *Kavya* and in Ba'na's *Ka'dambari.*

अथ

ऋतुसंहारम् ।

प्रथमः सर्गः ।

श्रीलक्ष्मीनृसिंहो विजयते ।

स्तम्भात्प्रभूय निजभक्तजनावनार्थं
यो वज्रसारनखैर्निजघान दैत्यम् ।
ब्रह्मेशशक्रनुतपूर्णगुणैकदेहः
श्रेयः स नो दिशतु देववरो नृसिंहः ॥ १ ॥

ऋतुसंहारकाव्यस्य टीकेयं बालबोधिनी ।
श्रीमदाचार्यशिष्येण वेङ्कटेशेन तन्यते ॥ २ ॥

'आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्' इति शास्त्रात्काव्यादौ वस्तुनिर्देशात् ऋतुसंक्षेपवर्णनलक्षणां कथां प्रस्तुवन्कश्चिन्नायकः स्वप्रियामाह—

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षम[1]वारिसंचयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालोऽय[2]मुपागतः प्रिये ॥ १ ॥

प्रचण्डेति ॥ हे प्रिये, प्रचण्डः प्रखरः सूर्यो यस्मिन्सः प्रचण्डसूर्यः । स्पृहणीयः आशंसनीयः चन्द्रमाश्चन्द्रो यस्मिन्सः स्पृहणीयचन्द्रमाः । सदा सर्वस्मिन्काले अवगाहक्षमः समज्जनस्नानयोग्यः वारिसंचयो जलसमूहो यस्मिन्सः सदावगाह-

१ क्षत । २ समुपागतः ।

क्षमवारिसंचयः। अवगाहेत्यत्र वगाहेति वा पदच्छेदः। तदा 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इत्यकारलोपः। क्षमेत्यत्र क्षतेति पाठः उत्तरश्लोकस्थक्षतशब्दस्यानुगुणोऽपि वारिसंचयक्षीणत्वेऽवगाहभिन्नस्य सूर्यतापस्यैव वस्तुतः कारणत्वान्न मनोरमः। उक्तं चात्रैव (१।२२) 'दिनकरपरितापक्षीणतोयाः समन्तात्' इति। दिनस्यान्तः नाशः सन्ध्याकाल इति यावत्। 'अन्तं स्वरूपे नाशे ना' इति मेदिनी। स रम्यः यस्मिन्सः। **दिनान्तरम्यः**। अभ्युपशान्तः निर्वाणं प्राप्तः मन्मथो यस्मिन्सः **अभ्युपशान्तमन्मथः**। **अयं निदाघकालः** ग्रीष्मकालः। **समुपागतः** संप्राप्तः। अस्य पद्यस्य समानार्थकं 'सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः। प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः' इति शाकुन्तलस्थं (१।३) पद्यम्॥ १॥

निशाः शशाङ्क[1]क्षतनीलराजयः
क्वचिद्विचित्रं जलयन्त्रमन्दिरम्।
मणिप्रकाराः सरसं च चन्दनं
शुचौ प्रिये यान्ति जनस्य सेव्यताम्॥ २॥

निशा इति॥ हे प्रिये, शशाङ्केन चन्द्रेण क्षता नाशिता नीलराजयः नैल्यविशिष्टतमःपङ्क्तयः यासु ताः **शशाङ्कक्षतनीलराजयः निशाः**। **क्वचित्** कुत्रचित्स्थले **विचित्रं जलयन्त्रमदिरं** जलयन्त्रेण युक्तं मन्दिरं गृहम्। **मणिप्रकाराः** मणीनां हीरकादिरत्नानां प्रकारा भेदाः। 'प्रकारस्तुल्यभेदयोः' इति मेदिनी। नानाविधरत्नानीति यावत्। **सरसं** सजलम्। आर्द्रमिति यावत्। **चन्दनं च**। **शुचौ** ग्रीष्मकाले। 'शुचिर्ग्रीष्माग्निशृङ्गारेषु' इति मेदिनी। **जनस्य सेव्यतां** सेवनविषयतां **यान्ति**। सर्वमेतज्जनैर्ग्रीष्मे उपभुज्यते इत्यर्थः। 'शशाङ्कःक्षतनीरराजयः' इति पाठे पूर्वश्लोके 'स्पृहणीयचन्द्रमाः' 'क्षतवारिसंचयः' इत्यादिनोपवर्णितवस्तूनामस्मिन्पद्ये सेव्यत्वेन वर्णनं कृतमिति ज्ञेयम्॥ २॥

इत आरभ्य श्लोकसप्तकेन ग्रीष्मकालिकरात्रिवृत्तं कविर्वर्णयति—

सुवासितं हर्म्यतलं मनोहरं
प्रियामुखोच्छ्वासविक[2]म्पितं मधु।

---

१ ०ङ्कः क्षतनीरराजयः। २ विकल्पितं।

सुतन्त्रिगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥ ३ ॥

सुवासितमिति ॥ कामिनः । शुचौ ग्रीष्मे । निशीथे रात्रौ । 'निशीथस्तु पुमानर्धरात्रे स्याद्रात्रिमात्रके' इति मेदिनी । **मदनस्य दीपनं** उत्तेजकम् **सुवासितं** पुष्पमालादिभिः सुगन्धीकृतम् । **मनोहरं हर्म्यतलं** हर्म्यपृष्ठम् । प्रियायाः कान्ताया मुखस्य उच्छ्वासेन निःश्वासेन विकम्पितं **प्रियामुखोच्छ्वासविकम्पितं मधु** मद्यम् । **सुतन्त्रिगीतं** शोभनाः तन्त्र्यः वीणागुणा यस्य तत्सुतन्त्रि वीणादि वाद्यं तद्युक्तं गीतं च । **अनुभवन्ति** आस्वदन्ते । कामिनां कामिनीनां च मधुपानं कविभिर्वर्ण्यते । तथा च 'मान्यभक्तिरथ वा सखीजनः सेव्यतामिदमनङ्गदीपनम् । इत्युदारमभिधाय शंकरस्तामपाययत पानमम्बिकाम्' इति कुमारसंभवे (८।७७) ॥ ३ ॥

नितम्बबिम्बैः स[1]दुकूलमेखलैः
स्तनैः सहाराभरणैः सचन्दनैः ।
शिरोरुहैः स्नानकषायवासितैः
स्त्रियो निदाघं शमयन्ति कामिनाम् ॥ ४ ॥

नितम्बेति ॥ दुकूलानि क्षौमाणि मेखला रसनाः ताभिः सहितैः **सदुकूलमेखलैः** । 'दुकूलं श्लक्ष्णवस्त्रे स्यात्क्षौमे च' इति मेदिनी । **नितम्बबिम्बैः** नितम्बमण्डलैः । 'बिम्बं तु प्रतिबिम्बे स्यान्मडले पुंनपुंसकम्' इति मेदिनी । हारा एवाभरणानि तैः सहितैः **सहाराभरणैः** । **सचन्दनैः** चन्दनानुलिप्तैः । **स्तनैः** । स्नाने यः कषायोऽङ्गरागः तेन वासितैः सुगन्धीकृतैः **स्नानकषायवासितैः** । 'कषायो रसभेदेऽपि निर्यासे च विलेपने । अङ्गरागे' इति मेदिनी । शिरसि रोहन्तीति शिरोरुहाः केशाः तैः **शिरोरुहैः** च । **स्त्रियः कामिनां निदाघं** ग्रीष्मोष्माणम् । 'निदाघो ग्रीष्मकाले स्यादुष्मस्वेदाम्बुनोरपि' इति मेदिनी । **शमयन्ति** शान्तिं नयन्ति । निवारयन्तीति यावत् ॥ ४ ॥

नितान्तलाक्षारसराग[2]रंजितै-
र्नितम्बिनीनां चरणैः सनूपुरैः ।

१ सुदुकूल । २ लोहितैः ।

पदे पदे हंसरुतानुकारिभि-
र्जनस्य चित्तं क्रियते समन्मथम् ॥ ५ ॥

नितान्तेति ॥ नितान्तमत्यन्तं यथा तथा लाक्षारसस्य अलक्तकद्रवस्य रागेण रङ्गेण रञ्जितैः रक्तीकृतैः **नितान्तलाक्षारसरागरञ्जितैः** । **सनूपुरैः** मञ्जीरसमेतैः । **पदे पदे हंसरुतानुकारिभिः** हंसस्य रुतं शब्दः । 'तिरश्चां वाशितं रुतम्' इत्यमरः । तं अनुकुर्वन्ति तच्छीलैः च । 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः । **नितम्बिनीनां चरणैः जनस्य** विषयिजनस्य **चित्तं समन्मथं क्रियते** ॥ ५ ॥

पयोधराश्चन्दनपङ्कचर्चिता-
स्तुषारगौरार्पितहारशेखराः[1] ।
नितम्बदेशाश्च[3] सहेममेखलाः
प्रकुर्वते कस्य मनो न सोत्सुकम् ॥ ६ ॥

पयोधराश्चेति ॥ चन्दनस्य पङ्केन द्रवेण चर्चिताः अनुलिप्ताः **चन्दनपङ्कचर्चिताः**। तुषारगौराः हिमवच्छ्वेताः अर्पिताः हारशेखराः हारश्रेष्ठा येषु ते **तुषारगौरार्पितहारशेखराः** । शेखरशब्दस्य श्रेष्ठार्थकत्वं कविविवक्षितम् । प्रयोगश्चात्रैव 'कलनूपुरशेखरैः' (३।२०) इति । अथ वा । तुषारगौराः ये अर्पितहाराः स्थापितमुक्ताहाराः ते शेखरे अग्रभागे येषाम् इति । अत्र 'दधाति वरकुचाग्रैरुन्नतैर्हारयष्टिं' इति (२।२५) वर्णनमनुकूलम् । **पयोधराः** । **सहेममेखलाः** सुवर्णमेखलासंगताः **नितम्बदेशाः** कटिपश्चाद्भागाश्च । 'पश्चान्नितम्बः स्त्रीकट्याः' इत्यमरः । **कस्य** जनस्य **मनः सोत्सुकं** सोत्कण्ठम् । उत्सुकमिति भावप्रधानो निर्देशः। न **प्रकुर्वते** इति काकुः । सर्वस्यापि कुर्वन्तीत्यर्थः । चतुर्थपद्येन प्रायः समानार्थकमेतत्पद्यम् ॥ ६ ॥

समुद्गतस्वेदचिताङ्गसंधयो[4][5]
विमुच्य वासांसि गुरूणि सांप्रतम् ।
स्तनेषु तन्वंशुकमुन्नतस्तना
निवेशयन्ति प्रमदाः सयौवनाः ॥ ७ ॥

---

१ शीतलाः । २ तुषारहारार्पितगौरशेखराः । ३ बिम्बाश्चलहेम । ४ समुद्यत । ५ शिताङ्ग ।

समुद्गतेति ॥ उन्नतस्तनाः उच्चपयोधराः सयौवनाः समुद्गतस्वेदचिताङ्गसंधयः समुद्गतेन समुत्पन्नेन स्वेदेन घर्मेण चिताः व्याप्ताः अङ्गसंधयो यासां ताः प्रमदाः । सांप्रतं अस्मिन्ग्रीष्मकाले स्तनेषु गुरूणि अलघूनि वासांसि वस्त्राणि विमुच्य परित्यज्य । तनु सूक्ष्मं अंशुकं वस्त्रं निवेशयन्ति स्थापयन्ति ॥ ७ ॥

सचन्दनाम्बुव्यजनोद्भवानिलैः[1]
सहारयष्टिस्तनमण्डलार्पणैः[2] ।
सवल्लकीकाकलिगीतनिस्वनै-
[3]र्विबोध्यते सुप्त इवाद्य मन्मथः ॥ ८ ॥

सचन्दनेति ॥ सचन्दनाम्बुव्यजनोद्भवानिलैः चन्दनाम्बुना चन्दनोदकेन सहितं यद्व्यजनं तालवृन्तं तस्मादुद्भवो येषां तैरनिलैः समीरैः । सहारयष्टिस्तन-मण्डलार्पणैः हारयष्टिभिः मुक्ताहारलताभिः सहितानि यानि स्तनमण्डलानि स्तन-प्रदेशाः तेषां अर्पणैः प्रदानैः । 'हारो मुक्तावली' इत्यमरः । 'यष्टिर्हारलताशस्त्र-भेदयोः' इति विश्वः । 'मण्डलं परिधौ कोठे देशे' इति मेदिनी । वल्लकीनां वीणानां काकलिभिरव्यक्तसूक्ष्मध्वनिभिः सहितं यद्गीतं तस्य निस्वनैर्ध्वनिभिः सवल्लकीकाकलिगीतनिस्वनैः च । 'काकली तु कले सूक्ष्मे' इत्यमरानुसारेण काकलीशब्दस्य दीर्घान्तत्वेऽपि अपरः ह्रस्वान्तः काकलिशब्दोऽस्ति । 'साधूदितं काकलिभिः कुलीनैः' इत्यभिनन्दप्रयोगात् । अद्य अस्मिन्ग्रीष्मसमये सुप्तः इव प्रसुप्तनायकः इव सुप्तो निद्रितः मन्मथः विबोध्यते जागृतिं नीयते । स्त्रीभिरिति शेषः । यथा कामाभिभूताः प्रमदाः व्यजनानिलादिभिरुपायैः प्रसुप्तं नायकं प्रबोधयन्ति तथा ग्रीष्मे प्रसुप्तमपि काममेतैरुपायैः प्रबोधयन्तीति भावः । उक्तं च भोजराजेन '–मृदुभिर्मर्दनैः पादे शीतलैर्व्यजनैस्तनौ । श्रुतौ च मधुरैर्गी-तैर्निद्रातो बोधयेत्प्रभुम्' इति ॥ ८ ॥

सितेषु हर्म्येषु निशासु योषितां
सुख[4]प्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य नूनं भृशमुत्सुकश्चिरं
निशाक्षये याति ह्रियेव पाण्डुताम् ॥ ९ ॥

१ चन्दनेन्दु । २ ०लार्पितैः । ३ प्रबुध्यते । ४ सुखानि सुप्तानि । ५ निर्यन्त्रणं । निर्यन्त्रितं ।

सितेष्विति ॥ भृशं अत्यन्तं उत्सुकः उत्कण्ठितः। चन्द्रमाः। निशासु रात्रिषु। 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपं चैव हलन्तानां यथा वाचा निशा दिशा' इति भागुरिमतानुसारेणायं प्रयोगः। सितेषु शुभ्रेषु। हर्म्येषु धनिनां गृहेषु। 'हर्म्यादि धनिनां वासः' इत्यमरः। योषितां सुखप्रसुप्तानि सुखं यथा तथा निद्रितानि। मुखानि। अत्र योषिन्निष्ठप्रस्वापस्य मुखे आरोपः। चिरं विलोक्य। निशाक्षये प्रातःकाले। नूनम् इति निश्चयार्थकम्। ह्रिया इव। सर्वजननमस्यश्चन्द्रोऽपि भूत्वा कथं परकान्तामुखावलोकने ईदृगासक्तोऽभूवमिति लज्जयेव। पाण्डुतां धूसरतां याति। हेतूत्प्रेक्षालंकारः। 'विलोक्य निर्यन्त्रणम्' इति पाठे निर्यन्त्रणं निष्प्रतिबन्धम्। 'ह्रियैव' इति पाठे नूनमित्युत्प्रेक्षार्थकम्। सितेष्विति हर्म्यविशेषणं सुखप्रसुप्तानीति मुखविशेषणं च सम्यङ्मुखविलोकनस्यानुकूल्यप्रदर्शनार्थम् ॥ ९ ॥

अतीतपद्यसप्तकेन ग्रैष्मनिशावृत्तान्तानुपवर्ण्य वक्ष्यमाणैः पद्यैः दिवावृत्तान्तानुपवर्णयति। तत्र प्रथमं प्रवासिजनदुर्दशामाह—

असह्यवातोद्धतरेणुमण्डला
प्रचण्डसूर्यातपतापिता मही।
न शक्यते द्रष्टुमपि प्रवासिभिः
प्रियावियोगानलदग्धमानसैः ॥ १० ॥

असह्येति ॥ असह्येन अत्युष्णतया दुःसहेन वातेन उद्धतमुत्क्षिप्तं रेणुमण्डलं रजःसमूहः यस्यां सा असह्यवातोद्धतरेणुमण्डला। प्रचण्डस्य सूर्यस्यातपेन प्रकाशेन 'प्रकाशो द्योत आतपः' इत्यमरः तापिता प्रचण्डसूर्यातपतापिता। मही। प्रियाणां कान्तानां वियोग एवानलो वह्निः तेन दग्धं मानसं येषां तैः प्रियावियोगानलदग्धमानसैः प्रवासिभिः पथिकैः। द्रष्टुमपि न शक्यते। गन्तुं न शक्यते इति किमु वक्तव्यमिति भावः ॥ १० ॥

मृगाः प्रचण्डातपतापिता भृशं
तृषा महत्या परिशुष्कतालवः।
वनान्तरे तोयमिति प्रधाविता
निरीक्ष्य भिन्नाञ्जनसंनिभं नभः ॥ ११ ॥

१ वातोद्गत। वातोक्षित।

मृगा इति ॥ भृशं । प्रचण्डातपतापिताः प्रचण्डेन आतपेन सूर्यप्रकाशेन तापिताः । महत्या । तृषा पिपासया परिशुष्काणि तालूनि येषां ते परिशुष्कतालवः । च मृगाः । वनान्तरे अन्यस्मिन्वने । भिन्नाञ्जनसंनिभं भिन्नं चूर्णितं यदञ्जनं सौवीरम् । भिन्नं मर्दितं अञ्जनं कज्जलमिति वा । तेन संनिभं सदृशम् । नभः ।निरीक्ष्य। तोयम् । इति बुद्धया प्रधाविताः प्रद्रुताः । भ्रान्तिमदलंकारः ॥११॥

सविभ्रमैः सस्मितजिह्मवीक्षितै-[1]
र्विलासवत्यो मनसि प्रवासिनाम्[2] ।
अनङ्गसंदीपनमाशु कुर्वते
यथा प्रदोषाः शशिचारुभूषणाः ॥ १२ ॥

सविभ्रमैरिति ॥ यथा शश्येव चारु भूषणं येषां ते शशिचारुभूषणाः । प्रदोषाः संध्यासमयाः तथा विलासवत्यः विलासिन्यः । विभ्रमेण विलासेन सहितैः सविभ्रमैः सस्मितैः ईषद्धास्यसहितैः जिह्मवीक्षितैः कुटिलावलोकनैः सस्मितजिह्मवीक्षितैः । प्रवासिनां । मनसि । आशु शीघ्रं अनङ्गसंदीपनं मदनस्य उद्दीपनं कुर्वते । इदं पद्यं ग्रीष्ममध्याह्नवर्णनप्रस्तावे प्रकरणविरुद्धार्थ-प्रतिपादनेन सहृदयानां वैमुख्यं जनयति । अत्रोपमाऽपि दोषदुष्टा वर्तते । अत एतत्पद्यं केनापि प्रक्षिप्तमिति प्रतिभाति ॥ १२ ॥

रवेर्मयूखैरभितापितो भृशं
विदह्यमानः पथि तप्तपांसुभिः ।
अवाङ्मुखो[3] जिह्मगतिः श्वसन्मुहुः
फणी मयूरस्य तले निषीदति ॥ १३ ॥

रवेरिति ॥ रवेः मयूखैः भृशं अभितापितः । तप्तपांसुभिः संतप्तधूलिभिः पथि विदह्यमानः विशेषेण संतप्यमानः । अवाक् अधः मुखं यस्य सः अवाङ्मुखः । जिह्मा कुटिला गतिर्गमनं यस्य सः जिह्मगतिः च । फणी भुजगः मुहुः श्वसन् फूत्कारं कुर्वन् । मयूरस्य तले निषीदति ॥ १३ ॥

तृषा महत्या हतविक्रमोद्यमः
श्वसन्मुहुर्[4]दूरविदारिताननः ।

१ मीक्षितैः । २ प्रसंगिनां । ३ अवाक्फणो । ४ भूरि ।

न हन्त्यदूरेऽपि गजान्मृगेश्वरो
विलोलजिह्वश्चलिताग्रकेसरः ॥ १४ ॥

तृषेति ॥ महत्या **तृषा** पिपासया । **हतविक्रमोद्यमः** हतो नष्टः विक्रमस्य आक्रमणस्य उद्यमो व्यवसायो यस्य सः । **मुहुः श्वसन्** । दूरं अतिमात्रं विदारितं विस्तारितं आननं येन सः दूरविदारिताननः । विशेषेण लोला चञ्चला जिह्वा यस्य सः **विलोलजिह्वः** । चलितानि कम्पितानि अग्राणि येषां तादृशाः केसराः सटाः यस्य सः **चलिताग्रकेसरः** च । चलिताः अग्रकेसराः श्रेष्ठकेसराः इति वा । 'अग्रं ... प्रधाने' इति मेदिनी । **मृगेश्वरः** सिंहः **अदूरे अपि** स्वसमीपेऽपि । प्राप्तानिति शेषः । **गजान् न हन्ति** ।। १४ ॥

विशुष्ककण्ठोद्गतशीकराम्भसो
गभस्तिभिर्भानुमतोऽभितापिताः ।
प्रवृद्धतृष्णोपहता जलार्थिनो
न दन्तिनः केसरिणोऽपि बिभ्यति ॥ १५ ॥

विशुष्केति॥ **विशुष्ककण्ठोद्गतशीकराम्भसः** विशुष्केभ्यः कण्ठेभ्यः उद्गतं शीकरमिश्रमम्भः येषां ते । विशुष्ककण्ठाहृत० इति पाठे विशुष्ककण्ठेभ्यः आहृतं गृहीतं शीकराम्भः यैस्ते । घर्माभितप्तैर्गजैः स्वमुखे शुण्डां संस्थाप्य ततो गृहीतैः शीकराम्भोभिः स्वशरीरमभ्युक्षयत इति गजानां स्वभावः । **भानुमतः** सूर्यस्य **गभस्तिभिः** किरणैः **अभितापिताः** । प्रवृद्धया वृद्धिं प्राप्तया तृष्णया उपहताः पीडिताः **प्रवृद्धतृष्णोपहताः** अत एव **जलार्थिनः दन्तिनः** द्विरदाः **केसरिणः अपि** सिंहादपि **न बिभ्यति** भीतिं नाप्नुवन्ति ।। १५ ॥

हुताग्निकल्पैः सवितुर्गभस्तिभिः
कलापिनः क्लान्तशरीरचेतसः ।
न भोगिनं घ्नन्ति समीपवर्तिनं
कलापचक्रेषु निवेशिताननम् ॥ १६ ॥

---

१ ०न्त्यदूरोऽपि । २ मृगं मृगाधिपः । ३ चलितस्वकेसरः । ४ कण्ठाहृत । कण्ठोद्गत । कण्ठोत्थित ।५ ०नुतापिताः पि तापिताः । ६ मरीचिभिः । । ७ चेतनाः ।

हुताग्नीति । **सवितुः हुताग्निकल्पैः** । हुताः दत्तहविषः अग्नयः वह्नयः । ईषदूनाः हुताग्नयः हुताग्निकल्पास्तैः । हुताग्नितुल्यैरिति यावत् । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति कल्पप् । **गभस्तिभिः** । **क्लान्तशरीरचेतसः** क्लान्तानि शरीराणि चेतांसि च येषां ते । **कलापिनः** बर्हिणः । **कलापचक्रेषु** बर्हमण्डलेषु । **निवेशिताननं** निवेशितं स्थापितं आननं येन तं **समीपवर्तिनं** । **अपिर्गम्यः** । **भोगिनं** भुजगं । **न घ्नन्ति** न हिंसन्ति ॥ १६ ॥

सभद्रमुस्तं परिशुष्ककर्दमं
सरः खनन्नायतपोत्रमण्डलैः ।
रवेर्मयूखैरभितापितो भृशं
वराहयूथो विशतीव भूतलम् ॥ १७ ॥

सभद्रेति । **रवेः मयूखैः भृशं अभितापितः** । अत एव **आयतपोत्रमण्डलैः** आयतैर्दीर्घैः पोत्रमण्डलैः मुखाग्रप्रदेशैः । पूयतेऽनेनेति पोत्रम् । 'हलसूकरयोः पुवः' इति ष्ट्रन् । 'पोत्रं वक्त्रे मुखाग्रे च सूकरस्य हलस्य च' इति । 'मण्डलं परिधौ कोठे देशे' इति च मेदिनी । **सभद्रमुस्तं** भद्रमुस्तैः भाषायां 'नागरमोथा' इति प्रसिद्धैः सहितं **परिशुष्ककर्दमं** परिशुष्कः कर्दमः यस्मिंस्तत् । **सरः खनन्** अवदारयन् । **वराहयूथः** सूकरसमूहः । **भूतलं** भूम्यधोभागम् । 'अधःस्वरूपयोरस्त्री तलम्' इत्यमरः । **विशतीव** उत्प्रेक्षायामिव शब्दः ॥१७॥

विवस्वता तीक्ष्णतरांशुमालिना
सपङ्कतोयात्सरसोऽभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः
फणातपत्रस्य तले निषीदति ॥ १८ ॥

विवस्वतेति । तीक्ष्णतराः प्रखरतराः अंशुमालाः किरणपरंपराः सन्त्यस्य तेन **तीक्ष्णतरांशुमालिना** । **विवस्वता** सूर्येण । **अभितापितः भेकः** मण्डूकः । पङ्केन सहितं तोयं यस्मिन् तस्मात् **सपङ्कतोयात्** । **सरसः** कासारात् **उत्प्लुत्य** । **तृषितस्य भोगिनः** सर्पस्य फणैवातपत्रं छत्रं तस्य **फणातपत्रस्य तले** अधःप्रदेशे **निषीदति** ॥ १८ ॥

---

१ सुभद्र० । २ परिपाण्डु० । ३ पोत्र । ४ प्रदीप्तभासा रविणाभितापितः । ५ तीव्रतरां० ।

समुद्धृताशेषमृणालजालकं
विपन्न[1]मीनं द्रुत[2]भीतसारसम् ।
परस्परोत्पीडन[3]संहतैर्गजैः
कृतं[4] सरः सान्द्रविमर्दकर्दमम् ॥ १९ ॥

समुद्धृतेति । परस्परं उत्पीडनं संघर्षणं यत्र यथा तथा संहतैः संलग्नैः **परस्परोत्पीडनसंहतैः गजैः** । **सरः** । **समुद्धृताशेषमृणालजालकं** समुद्धृतानि समुत्क्षिप्तानि अशेषाणि मृणालजालकानि बिसवृन्दानि यस्मात्तत् । **विपन्नमीनं** विपन्ना नाशं गताः मीना यस्मिंस्तत् । **द्रुतभीतसारसं** द्रुताः पलायिताः भीतसारसाः भीतपुष्कराह्वाः यस्मात्तत् । **सान्द्रविमर्दकर्दमम्** । सान्द्रः निबिडः विमर्दः मर्दनं यस्य तादृशः कर्दमः पङ्कः यस्मिन् तादृशं कृतम् ॥ १९ ॥

रविप्रभोद्भिन्नशिरोमणिप्रभो
विलोलजिह्वाद्वयलीढमारुतः ।
विषा[5]ग्निसूर्यातपतापितः फणी
न हन्ति मण्डूककुलं तृषाकुलः[6] ॥ २० ॥

रविप्रभेति । रवेः प्रभया उद्भिन्ना उद्गता शिरोमणिप्रभा मस्तकमणिकान्तयः यस्य सः **रविप्रभोद्भिन्नशिरोमणिप्रभः** । विलोलेन तरलेन जिह्वाद्वयेन लीढः आस्वादितः मारुतः पवनः येन सः **विलोलजिह्वाद्वयलीढमारुतः** विषाग्नि सूर्यातपश्च तेन तापितः **विषाग्निसूर्यातपतापितः** । अत एव **तृषा आकुलः** । **फणी** भजगः **मण्डूककुलं** भेकसमूहं **न हन्ति** ॥ २० ॥

सफेनला[7]लावृतवक्त्रसंपुटं
विनिःसृ[8]तालोहितजिह्वमुन्मुखम्[9][10] ।
तृषाकुलं निःसृतमद्रिगह्वरा[11]-
दवेक्षमाणं[12] महिषीकुलं जलम् ॥ २१ ॥

सफेनेति । सफेनं रोमन्थोद्गतफेनसहितं लालावृतं च वक्त्रसंपुटं यस्य तत् **सफेनलालावृतवक्त्रसंपुटम्** । विनिःसृता मुखाद्बहिर्निर्गता आलोहिता ईषद्रक्ता जिह्वा

१ विखिन्न । २ भीनाद्भुतभीतसारसम् । ३ पीडित । ४ क्षतम् । ५ पीत । ६ हुताग्नि० । ७ कुलं । ८ लोलायत । ९ विनिर्गता । १० उत्सुकम् । ११ कन्दरात् । १२ गवेषयाणं-अवेक्ष्यमाणं ।

यस्य तत् विनिःसृतालोहितजिह्वम् । तृषाकुलं । ऊर्ध्वं मुखं यस्य तत् उन्मुखं च महिषीकुलं महिषीयूथं जलं अवेक्षमाणं गवेषयमाणं सत् । अद्रिगह्वरात् पर्वतबिलात् । निःसृतम् ॥ २१ ॥

पटुतरदवदाहोच्छुष्कसस्यप्ररोहाः
परुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः ।
दिनकरपरितापक्षीणतोयाः समन्ता-
द्विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥ २२ ॥

पटुतरेति । पटुतरदवदाहेन प्रबलतरदावाग्नितापेन उच्छुष्काः सस्यप्ररोहाः वृक्षादिफलाङ्कुराः येषु ते **पटुतरदवदाहोच्छुष्कसस्यप्ररोहाः** । परुषस्य रूक्षस्य 'परुषं कर्बुरे रूक्षे' इति मेदिनी । पवनस्य वेगेन उत्क्षिप्तानि ऊर्ध्वं नीतानि संशुष्कपर्णानि येषु ते **परुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः** । समन्तात् सर्वतः दिनकरस्य परितापेन क्षीणानि तोयानि येषु ते । **दिनकरपरितापक्षीणतोयाः** च **वनान्ताः** । वनप्रान्ताः । 'अन्तं स्वरूपे निकटे प्रान्ते' इति हैमः । **वीक्ष्यमाणाः** आलोक्यमानाः सन्तः **उच्चैः** महत् । 'महत्युच्चैः' इत्यमरः । **भयं विदधति** भीतिमुत्पादयन्ति ॥ २२ ॥

श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जम् ।
भ्रमति गवययूथः सर्वतस्तोयमिच्छ-
ञ्शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥ २३ ॥

श्वसितीति । शीर्णानि गलितानि पर्णानि येषां ते च ते द्रुमाश्च तेषु तिष्ठति सः **शीर्णपर्णद्रुमस्थः** **विहगवर्गः** पक्षिसमूहः । **श्वसिति** । प्रमाणाधिकमिति शेषः । **क्लान्तं** ग्लानं **कपिकुलं** **अद्रेः** **निकुञ्जं** लतादिविहितस्थानम् । 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः । **उपयाति** । **गवययूथः** **तोयम् इच्छन् सर्वतः भ्रमति** । **शरभकुलं** शरभाणां अष्टापदप्राणिविशेषाणाम् । 'अष्टापदे च करभे शरभः स्यान्मृगान्तरे' इति रभसः ।

१ दाहात् । वनदाहात् । २ शष्पप्ररोहाः । ३ पवनवेगात् । ४ परितापात् । ५ वृन्दः । ६ द्रुमान्तः । ७ निकुञ्जे । ८ अजिह्मं । ९ प्रोद्धरेदम्बु ।

कुलं समूहः । आजिह्मं निरलसं सत् । ' जिह्मस्तु कुटिलेऽलसे ' इत्यमरः । कूपात् अम्बु । प्रोद्धरति उद्धृतातीत्यर्थः ॥ २३ ॥

विकचनवकुसुम्भस्वच्छसिन्दूरभासा
प्रबलपवनवेगोद्भूतवेगेन तूर्णम् ।
तरुविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन ॥ २४ ॥

विकचेति । विकचानि फुल्लानि यानि नवकुसुम्भानि नूतनकुसुम्भपुष्पाणि स्वच्छं निर्मलं यत्सिन्दूरं नागसंभवं 'शेंदूर' इति ख्यातं । 'सिन्दूरं नागसंभवम् ' इत्यमरः । तस्य भाः इव भाः यस्य तेन **विकचनवकुसुम्भस्वच्छसिन्दूरभासा** **प्रबलपवनवेगोद्भूतवेगेन** प्रबलपवनवेगेन उद्भूतः वेगो यस्य तेन । ' परुषपवन० ' इति पाठः ' पटुतरदवदाह० ' इति (१।२२) श्लोकस्थद्वितीयपादगतशब्दानुगुणः । **तरुविटपलताग्रालिङ्गनव्याकुलेन** तरुविटपाः वृक्षशाखाः लताश्च तेषां अग्राणां आलिङ्गने व्याकुलेन व्यासक्तेन । ' तटविटप० ' इति पाठे तटे क्षेत्रे । ' तटं नपुंसकं क्षेत्रे ' इति मेदिनी । ये विटपा लताश्च तेषां अग्राणां समूहानाम् इत्यादि । 'अग्रं...समूहे' इति मेदिनी । **पावकेन** अग्निना । **दिशि दिशि भूमयः** । **तूर्णं** शीघ्रं । **परिदग्धाः** ॥ २४ ॥

ज्वलति पवनवृद्धः पर्वतानां दरीषु
स्फुटति पटुनिनादैः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
ग्लपयति मृगवर्गं प्रान्तलग्नो दवाग्निः ॥ २५ ॥

ज्वलतीति । **प्रान्तलग्नः** प्रान्तभागसक्तः । **दवाग्निः** दावानलः । **पवनवृद्धः** सन् । **पर्वतानां दरीषु ज्वलति** । **पटुनिनादः** व्यक्तध्वनिः सन् । **शुष्कवंशस्थलीषु** शुष्काः वंशाः यासु ताश्च ताः स्थल्यः अकृत्रिमभूमयः तासु । **स्फुटति** स्फोटनध्वनिं करोतीत्यर्थः । ' पटुनिनादैः ' इति पाठः प्रक्रान्तप्रथमान्तविशेषणविरुद्धत्वान्न समीचीनः । **क्षणेन तृणमध्ये लब्धवृद्धिः** प्राप्तविस्तृतिः सन् । **प्रसरति** । **मृगवर्गं ग्लपयति** व्याकुलयति चेत्यर्थः ॥ २५ ॥

---

१ परुष । प्रवण । २ वेगोद्भूत । ३ तटविटप । ४ ध्वनति । पतति । ५ विद्धः । ६ पर्वतान्तर्दरीषु । ७ स्फुरति । ८ निनादैः । ९ मध्यं । १० क्षपयति । तपयति । ११ मृगवृन्दं । यूथं ।

बहुतर[1] इव जातः शाल्मलीनां वनेषु
स्फुरति[2] कनकगौरः कोटरेषु द्रुमाणाम् ।
परिणतदलशाखानुत्पतन्प्रांशुवृक्षा-[3]
न्भ्रमति[4] पवनधूतः सर्वतो[5]ऽग्निर्वनान्ते ॥ २६ ॥

बहुतर इति । **पवनधूतः** । पवनेन वायुना धूतः चालितः । **अग्निः शाल्मलीनां** लोके 'शेवरी' इति प्रसिद्धवृक्षाविशेषाणां **वनेषु** । **बहुतरः जातः इव** वृद्धिं प्राप्त इव । **स्फुरति** दीप्यते । शाल्मलीपुष्पाणां वह्निवदारक्तत्वात् । **द्रुमाणां कोटरेषु** विवरेषु । **कनकगौरः** सन् **स्फुरति** संचलति । परिणतानि परिपक्वानि दलानि पर्णानि यासु तादृश्यः शाखा येषां तान् **परिणतदलशाखान् प्रांशु-वृक्षान् उत्पतन्** उद्गच्छन् सन् । **वनान्ते** वनप्रदेशे **सर्वतः भ्रमति** ॥ २६ ॥

गजगवयमृगेन्द्रा वह्निसंतप्तदेहा
सुहृद इव समेता[6] द्वन्द्वभावं[7] विहाय ।
हुतवहपरिखेदादाशु निर्गत्य[8] कक्षा-
द्विपुलपुलिनदेशां[9] निम्नगां संविशन्ति[10] ॥ २७ ॥

गजेति । **वह्निसंतप्तदेहाः गजगवयमृगेन्द्राः** गजाश्च गवयाश्च मृगेन्द्राश्च **द्वन्द्व-भावं** वैरभावं । **विहाय** । **सुहृदः इव** मित्राणीव **समेताः** संगताः सन्तः **हुतवह-परिखेदात्** हुतवहस्य अग्नेः परिखेदात् त्रासात् **कक्षात्** अरण्यात् । 'कक्षोऽरण्ये च वीरुधि' इति धरणिः । **निर्गत्य** । निष्क्रम्य । विपुलः विस्तीर्णः पुलिनदेशः यस्याः तां **विपुलपुलिनदेशां निम्नगां** नदीं **संविशन्ति** प्रविशन्ति ॥ २७ ॥

कमलवन[11]चिताम्बुः पाटलामोदरम्यः
सुखसलिलनिषेकः सेव्यचन्द्रांशुहारैः[12] ।
व्रजतु तव निदाघः कामिनीभिः समेतो[13]
निशि सुललित[14]गीते हर्म्यपृष्ठे सुखेन ॥ २८ ॥

---

१ पटुतर इव यातः । २ स्फुटति । ३ परिणतदलशाखादुत्पतत्याशु वृक्षात् । परिणतदल-शाखान्निर्दहन् शुष्कवृक्षान् । ४ दहति । ५ सर्वशो । ६ समन्तात् । ७ शत्रुभावं । ८ निर्गम्य । ९ देशात् । १० आश्रयन्ते । ११ दल । १२ जालः । १३ समेतम् । १४ गीतैः ।

कमलेति । कमलवनेन चितं व्याप्तं अम्बु जलं यस्मिन् सः **कमलवनचिताम्बुः** । पाटलानां पाटलपुष्पाणां आमोदेन रम्यः **पाटलामोदरम्यः** । सुखः सुखजनकः सलिलनिषेकः उदकाभिषेकः यस्मिन् सः **सुखसलिलनिषेकः** । सेव्याश्चन्द्रांशवः हाराः मौक्तिकहाराश्च यस्मिन् सः **सेव्यचन्द्रांशुहारः** । कामिनीभिः समेतः युक्तः निदाघः ग्रीष्मः निशि रात्रौ सुललितं अतिसुन्दरं गीतं यस्मिन् तस्मिन् सुललितगीते हर्म्यपृष्ठे तव सुखेन व्रजतु तव सुखाय भवत्वित्यर्थः॥२८॥

इति बालबोधिनीटीकासहितस्य ऋतुसंहारकाव्यस्य ग्रीष्मवर्णनं नाम प्रथमः सर्गः ॥

द्वितीयः सर्गः।

अथ क्रमागतं वर्षर्तुं वर्णयति—

सशीकराम्भोधर[1]मत्तकुञ्जर-
स्तडित्पताकोऽशनिशब्द[2]मर्दलः।
समागतो राजवदु[3]द्धतद्युति-
र्घ[4]नागमः कामिजनप्रियः प्रिये ॥ १ ॥

सशीकरेति ॥ सशीकराः साम्बुकणाः ये अम्भोधराः मेघाः ते एव मत्त-कुञ्जराः मददन्तिनः यस्य सः सशीकराम्भोधरमत्तकुञ्जरः। पक्षे सशीकरा-म्भोधराः इव मत्तकुञ्जराः यस्य। तडित् विद्युत् एव पताका ध्वजो यस्य सः तडित्पताकः। पक्षे, तडिदिव पताका यस्य। अशनिशब्द एव विद्युद्ध्व-निरेव। 'अशनिः स्त्रीपुंसयोः स्याच्चञ्चलायां' इति मेदिनी। मर्दलः वाद्य-विशेषः यस्य सः अशनिशब्दमर्दलः। पक्षे, अशनिशब्दः इव मर्दलः यस्य। उद्धतद्युतिः उत्कटकान्तिः। कामिजनप्रियः विषयिजनप्रियश्च। पक्षे, अर्थि-जनप्रियः। घनागमः वर्षर्तुः। राज्ञा तुल्यं राजवत्। 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिः। समागतः ॥ १ ॥

नितान्तनीलोत्पलपत्रकान्तिभिः
क्वचित्प्रभिन्नाञ्जनराशिसंनिभैः।
क्वचित्सगर्भप्रमदास्तनप्रभैः
समाचितं व्योम घनैः समन्ततः ॥ २ ॥

नितान्तेति। नितान्तं अत्यन्तं। नीलानि च तानि उत्पलानि च तेषां पत्राणां कान्तिरिव कान्तिर्येषां तैः नितान्तनीलोत्पलपत्रकान्तिभिः। क्वचित् कुत्र-चित्स्थले प्रभिन्नं चूर्णितं मर्दितं वा अञ्जनं सौवीरं कज्जलं वा तस्य यो राशिः

१ रक्तकुञ्जरः। मत्तवारणः। २ मर्दनः। ३ उन्मतध्वनिः–उद्धतध्वनिः। उद्वहन्ध्वनिम्। ४ घनाघनः।

समूहः तेन संनिभैः समैः **प्रभिन्नाञ्जनराशिसंनिभैः** क्वचित् च गर्भेण सहितानां प्रमादानां स्तनानां लक्षणया स्तनाग्राणां प्रभेव प्रभा येषां तैः **सगर्भप्रमदास्तनप्रभैः**। गर्भिणीस्तनानां कृष्णवर्णत्वे वाग्भटः–' आम्लेष्टता स्तनौ पीनौ श्वेतान्तौ कृष्णचूचुकौ ' इति। ' दिनेषु गच्छत्सु निनान्तपीवरं तदीयमानीलमुखं स्तनद्वयम्'इति रघु० ३–८। **घनैः** व्योम गगनं **समन्ततः समाचितं** व्याप्तम् ॥२॥

तृषाकुलैश्चातकपक्षिणां कुलैः
प्रयाचितास्तोयभरावलम्बिनः।
प्रयान्ति मन्दं बहु[1]धार[2]वर्षिणो
बलाहकाः श्रोत्रमनोहरस्वनाः ॥ ३ ॥

तृषाकुलैरिति। **तृषाकुलैः चातकपक्षिणां कुलैः** समूहैः **प्रयाचिताः**। तोयमिति शेषः। **तोयभरावलम्बिनः** तोयभरेण जलभारेण अवलम्बन्ते तच्छीलाः। ' सुप्यजातौ णिनिस्ताच्छील्ये ' इति णिनिः। बह्व्यो धाराः यस्यां क्रियायां यथा भवति तथा वर्षन्ति ते **बहुधारवर्षिणः**। श्रोत्रयोर्मनोहरः स्वनः रवः येषां ते **श्रोत्रमनोहरस्वनाः**। **बलाहकाः** मेघाः। वारीणां वाहकाः बलाहकाः। पृषोदरादित्वात्साधुः। **मन्दं प्रयान्ति**। गगने इति शेषः ॥ ३ ॥

बलाहकाश्चाशनिशब्दमर्द[3]लाः
सुरेन्द्रचापं दधतस्तडिद्गुणम्।
[4]सुतीक्ष्णधारापतनोग्रसा[5]यकै-
स्तुदन्ति चेतः प्र[6]सभं प्रवासिनाम् ॥ ४ ॥

बलाहका इति। अशनिशब्दः विद्युद्ध्वनिः एव मर्दलः वाद्यविशेषः येषां ते **अशनिशब्दमर्दलाः**। तडिदेव गुणः मौर्वी यस्य तत् **तडिद्गुणं सुरेन्द्रचापं** शक्रधनुः। **दधतः** धारयन्तः। **बलाहकाः** मेघाः च। सुतीक्ष्णानि धारापतनान्येव उग्रसायकाः निशितशराः तैः **सुतीक्ष्णधारापतनोग्रसायकैः प्रवासिनां** अध्वगानां **चेतः प्रसभं** बलात्कारेण **तुदन्ति** व्यथयन्ति ॥ ४ ॥

प्रभिन्नवैदूर्यनिभैस्तृणाङ्कुरैः
समाचिता प्रोत्थितकन्दलीदलैः।

---

१ नव। २ वारि। ३ भूषणाः। भीषणाः। ४ सुतीव्र। ५ सायकाः। ६ ध्वनिभिः। नितराम्। युगपत्।

विभाति शु[१]क्लेतररत्नभूषिता
वराङ्गनेव क्षितिरिन्द्रगोपकैः ॥ ५ ॥

प्रभिन्नेति। प्रभिन्नेन प्रस्फुटितेन वैदूर्येण नीलमणिना निभैः सदृशैः **प्रभिन्नवैदूर्यनिभैः** । विदूरात्प्रभवति वैदूर्यो मणिः । 'विदूराञ्ञ्यः' इति ञ्यप्रत्ययः । **तृणाङ्कुरैः** । तृणप्ररोहैः । **प्रोत्थितकन्दलीदलैः** समुद्गतभूमिकदलीपत्रैः । **इन्द्रगोपकैः** वर्षाकालेऽद्भूतैः आरक्तकृमिविशेषैश्च । **समाचिता** व्याप्ता । **क्षितिः** भूमिः । **शुक्लेतररत्नभूषिता** शुक्लादितरैः रक्तहरितनीलवर्णैः रत्नैर्भूषिता **वराङ्गना इव विभाति** । उपमाऽलंकारः ॥ ५ ॥

सदा म[२]नोज्ञं स्वनदुत्सवोत्सुकं
वि[३]कीर्णवि[४]स्तीर्णकलापशोभितम् ।
[५]ससंभ्रमालिङ्गनचुम्बनाकुलं
प्रवृ[६]त्तनृत्यं कुलमद्य बर्हिणाम् ॥ ६ ॥

सदेति। **सदा मनोज्ञं** मनोहरम् । इदं स्वनदित्यस्य विशेषणम् । **स्वनत्** शब्दं कुर्वत् । उत्सवे आनन्दजनकव्यापारे उत्सुकं उत्कण्ठितं **उत्सवोत्सुकम्** । 'मनोज्ञाम्बुदनादसोत्सुकम्' इति पाठे मनोज्ञे अम्बुदनादे सोत्सुकमित्यर्थः । विकीर्णः प्रसारितः विस्तीर्णः दीर्घः यः कलापः बर्हः तेन शोभितं **विकीर्णविस्तीर्णकलापशोभितम्** । ससंभ्रमं सत्वरं यदालिङ्गनं चुम्बनं च तस्मिन्नाकुलं व्यासक्तं । **ससंभ्रमालिङ्गनचुम्बनाकुलं** । **बर्हिणां** मयूराणां । **कुलं** । **अद्य प्रवृत्तनृत्यं** प्रारब्धनर्तनम् । दृश्यते इति शेषः ॥ ६ ॥

निपा[७]तयन्त्यः परितस्तटद्रुमा-
[८]न्प्रवृद्धवेगैः सलिलैरनिर्मलैः ।
स्त्रियः सु[९]दुष्टा इव जातविभ्रमाः
प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ॥ ७ ॥

निपातयन्त्य इति । प्रवृद्धः वेगः येषां तैः **प्रवृद्धवेगैः** । प्रवृद्धोत्साहैः इति च ध्वन्यते । **अनिर्मलैः** कलुषैः रागावृतैश्च । **सलिलैः** जलैः सलिलतुल्यचञ्चलमनोभिश्च ।

---

१ कण्ठे वररत्नभूषिता । कृष्णेतररत्नभूषिता । २ मनोज्ञस्तनितोत्सुकोत्सुकं । मनोज्ञाम्बुदनादसोत्सुकं । मनोज्ञं सुरतोत्सवोत्सुकं । ३ विभाति । ४ केशालकलाप । ५ सविभ्रमा । ६ प्रवृद्धनृत्यं । ७ विपाटयन्त्यः । उत्पाटयन्त्यः । ८ प्रवृद्धवेगाः । ९ प्रहृष्टाः । प्रदुष्टाः । प्रकामाः ।

तटद्रुमान् तीरवृक्षान् । स्वकीयकुलपुरुषान् इति ध्वनिः । **परितः** सर्वतः **निपातयन्त्यः** समुन्मूलयन्त्यः । दुर्गतिं प्रापयन्त्य इति ध्वनिः । जाताः विभ्रमाः अम्भोभ्रमाः चित्तवृत्त्यनवस्थानं च यासां ताः **जातविभ्रमाः** । 'चित्तवृत्त्य-नवस्थानं शृङ्गाराद्विभ्रमो मतः' इत्युक्तेः । **नद्यः** । **सुदुष्टाः स्त्रियः इव** स्वैरिण्य इव । **त्वरितं** क्षिप्रं । **पयोनिधिं** समुद्रम् । कामुकमिति ध्वनिः । **प्रयान्ति** ॥ ७ ॥

तृणोत्करै[1]रुद्ग[2]तकोमलाङ्कुरै-
श्चि[3]तानि नीलैर्हरिणीमुखक्षतैः ।
वनानि वैन्ध्या[4]नि हरन्ति मानसं
विभूषितान्युद्गतप[6]ल्लवैर्द्रुमैः ॥ ८ ॥

तृणोत्करैरिति । **नीलैः** नीलवर्णैः । हरिणीमुखैः क्षताः खण्डिताः तैः **हरिणीमुखक्षतैः** । उद्गताः उद्भिन्नाः कोमलाङ्कुराः येषां तैः **उद्गतकोमलाङ्कुरैः** । **तृणोत्करैः** तृणपुञ्जैः । **चितानि** व्याप्तानि । 'विचित्रनीलैः' इति पाठो न समीचीनः विचित्रपदार्थस्य अपुष्टार्थकत्वात् । उद्गताः पल्लवाः येषां तैः । **उद्गतपल्लवैः** । **द्रुमैः** च । **विभूषितानि** । विन्ध्यस्य तन्नामकगिरेरिमानि **वैन्ध्यानि** । 'तस्येदम्' इत्यण् । **वनानि** कामिनामिति शेषः । **मानसं हरन्ति** । संनिधवस्तुवर्ण-नस्य स्वाभाविकत्वादस्मिन् श्लोके वैन्ध्यानीति विशेषणं कवेः विन्ध्यगिरि-निकटावस्थानं सूचयति । पुनरत्रैव सर्गे २७ श्लोके 'ह्लादयन्तीव विन्ध्यम्' इति । मालविकाग्निमित्रे च 'मेघराजीव विन्ध्यम्' (३।२१) इति च स एव वर्णितः । अतश्च 'रम्याणि' इति केषांचित्पाठो न कविकृत इति प्रतिभाति ॥८॥

विलोलनेत्रोत्पल[7]शोभिताननै-
र्मृगैः समन्तादुपजा[8]तसाध्वसैः ।
समाचिता सै[9]कतिनी वनस्थली
समुत्सुकत्वं प्रकरोति चेतसः ॥ ९ ॥

विलोलेति । **उपजातसाध्वसैः** । उपजातं समुत्पन्नं साध्वसं भयं येषां तैः । अत एव **विलोलनेत्रोत्पलशोभिताननैः** विलोलैः चञ्चलैः नेत्रोत्पलैः शोभितानि

---

१ तृणोद्गमैः । तृणोच्चयैः । २ उद्गत--कर्दमकोमलाङ्कुरैः । उद्गतकोशकुड्मलैः । ३ विचित्र । ४ लेखैः । ५ रम्याणि । ६ पल्लवद्रुमैः । ७ विलोलनीलेक्षणशोभिताननैः । ८ उपयात । ९ शैवलिनी ।

आननानि येषां तैः **मृगैः** । **समन्तात्** सर्वतः । **समाचिता** व्याप्ता । सिकतामयस्थानानि विद्यन्ते अस्यां सा **सैकतिनी** । 'सैकतं सिकतामयम्' इत्यमरः । **वनस्थली** वनस्य काननस्य स्थली अकृत्रिमभूमिः । **चेतसः समुत्सुकत्वं** समुत्कण्ठितत्वं **प्रकरोति** । वनस्थलीस्थिततादृङ्मृगदर्शनेन विशाललोललोचनकान्तावदनस्मरणादौत्सुक्यमिति भावः । अयमेवाभिप्रायः 'तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः कर्णान्तमेत्य बिभिदे निबिडोऽपि मुष्टिः । त्रासातिमात्रचटुलैः स्मरतः सुनेत्रैः प्रौढप्रियानयनविभ्रमचेष्टितानि ।' इति (९।५८) रघुवंशस्थे पद्ये। 'सहवसतिमुपेत्य यैःप्रियायाः कृत इव मुग्धविलोकितोपदेशः ।' इति शाकु० २–३ पद्ये च ॥९ ॥

अभीक्ष्णमुच्चैर्ध्वनता पयोमुचा
घनान्धकारीकृतशर्वरीष्वपि ।
तडित्प्रभादर्शितमार्गभूमयः
प्रयान्ति रागादभिसारिकाः स्त्रियः ॥ १० ॥

अभीक्ष्णमिति । **अभीक्ष्णं** मुहुर्मुहुः । **उच्चैः** अत्यर्थं **ध्वनता पयोमुचा** मेघेन । न घनान्धकाराः अघनान्धकाराः । अघनान्धकाराः घनान्धकाराः संपद्यमानाः कृताः घनान्धकारीकृताः ताश्च ताः शर्वर्यः रात्रयः तास्वपि **घनान्धकारीकृतशर्वरीष्वपि** । एतादृग्गमनप्रतिबन्धकारणे सत्यपीत्यर्थः । तडित्प्रभया दर्शिताः मार्गभूमयः यासां ताः **तडित्प्रभादर्शितमार्गभूमयः** । **अभिसारिकाः** कान्तेच्छया संकेतस्थानगामिन्यः 'कान्तार्थिनी तु या याति संकेतं साऽभिसारिका ।' इत्यमरः । **स्त्रियः** । **रागात्** प्रियानुरागेण । **प्रयान्ति** गच्छन्ति । अत्र अभिसारिकाः इत्यनेनैवार्थाभिव्यक्तौ स्त्रियः इति रागात् इति च पदं निष्प्रयोजनम् । 'गच्छन्तीनां रमणवसतिम्' इति मेघदूतस्थं (१।३७) 'रजनीतिमिरावगुण्ठिते' इति च कुमारसंभवस्थं (४।११) पद्यं एतत्समानार्थकम् ॥१०॥

पयोधरैर्भीमगभीरनिस्वनै-
स्तडिद्भिरुद्वेजितचेतसो भृशम् ।
कृतापराधानपि योषितः प्रिया-
न्परिष्वजन्ते शयने निरन्तरम् ॥ ११ ॥

---

१ सुतीक्ष्णम् । २ ध्वनतां । ध्वनितैः । स्वनतां । रसतां । ३ पयोमुचां । ४ घनान्धकारावृत । ५ परुषं पराः स्त्रियः । ६ ध्वनद्भिः । स्वनद्भिः ।

पयोधरैरिति । भीमः भयंकरः गभीरः गम्भीरश्च निस्वनः ध्वनिर्येषां तैः **भीमगभीरनिस्वनैः**। **पयोधरैः** । **तडिद्भिः** विद्युद्भिः । चकारो गम्यः । उद्वेजितानि व्याकुलीकृतानि चेतांसि यासां ताः **उद्वेजितचेतसः**। **योषितः**। **कृतापराधान् अपि**। अनेन परिष्वङ्गयोग्यताभावो दर्शितः । **प्रियान्** स्वपतीन्। **शयने निरन्तरं** निर्गतं अन्तरं अवकाशः यस्मिन्कर्मणि यथा तथा । दृढमिति यावत् । **परिष्वजन्ते** आलिङ्गन्ति । 'प्रणयकोपभृतोऽपि पराङ्मुखाः' इति शिशुपालवधस्थपद्येन (६।३८) समानार्थकमेतत्पद्यम् ॥ ११ ॥

विलोचनेन्दीवरवारिबिन्दुभि-
र्निषिक्तबिम्बाधरचारुपल्लवाः ।
निरस्तमाल्याभरणानुलेपनाः
स्थिता निराशाः प्रमदाः प्रवासिनाम् ॥ १२ ॥

विलोचनेन्दीवरेति । **विलोचनेन्दीवरवारिबिन्दुभिः** । विलोचनानि इन्दीवराणीव तेषां वारिबिन्दुभिः अश्रुभिरिति यावत् । अधराः चारुपल्लवाः इव अधर०ल्लवाः। बिम्बानीव अध०पल्लवाः बिम्बाधर०पल्लवाः। निषिक्ताः बिम्बाधरचारुपल्लवाः यासां ताः **निषिक्तबिम्बाधरचारुपल्लवाः**। अत्र बिम्बपल्लवशब्दौ रक्तत्वकोमलत्वद्योतकौ। निरस्तानि पतिप्रवासकाले परित्यक्तानि माल्यानि पुष्पमालाः आभरणानि मण्याद्यलंकाराः अनुलेपनानि चन्दनाद्यङ्गरागाश्च याभिस्ताः **निरस्तमाल्याभरणानुलेपनाः** । पत्यौ प्रोषिते तस्य निषेधात्। **प्रवासिनां प्रमदाः** । **निराशाः** सत्यः **स्थिताः** । प्रियसमागमने निराशाः संवृत्ताः इत्यर्थः ॥ १२ ॥

विपाण्डुरं[२] कीटरजस्तृणान्वितं
भुजंगवद्वक्रगति[३]प्रसर्पितम् ।
ससाध्वसैर्भेककुलैर्निरीक्षितं[४]
प्रयाति निम्नाभिमुखं नवोदकम् ॥ १३ ॥

विपाण्डुरमिति । पाण्डुवर्णोऽस्यास्तीति पाण्डुरं धूसरं । मलिनमिति यावत् । 'नगपांसुपाण्डुभ्यश्च' इति वार्तिकात् मत्वर्थीयो रप्रत्ययः । विशेषेण पाण्डुरं **विपाण्डुरम्** । कीटैः रजोभिः तृणैश्च अन्वितं **कीटरजस्तृणान्वितम्** । भुजंगेन

---

१ कृताः । २ विपाण्डनम् । ३ भुजङ्गमाकारगति । ४ विलोकितम् ।

तुल्यं भुजंगवत् । 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिः । **वक्रगतिप्रसर्पितम्** । वक्रा कुटिला गतिर्यस्य तादृशं प्रसर्पितं प्रसर्पणं यस्य तत् । नपुंसके भावे क्तः । **ससाध्वसैः** सभयैः । भुजंगतुल्यवक्रगत्या भुजंगभ्रान्त्या भीतिः । **भेककुलैः** निरीक्षितं । **नवोदकं** । **निम्नाभिमुखं** नीचस्थानाभिमुखं **प्रयाति** ॥ १३ ॥

विपत्त्रपुष्पां[1] नलिनीं समुत्सुका[2]
विहाय भृङ्गाः श्रुतिहारिनिस्वनाः[3] ।
पतन्ति मूढाः शिखिनां प्रनृत्यतां[4]
कलापचक्रेषु नवोत्पलाशया[5] ॥ १४ ॥

विपत्रेति । **श्रुतिहारिनिस्वनाः** श्रुतिं हरन्ति तच्छीलाः निस्वनाः येषां ते । **मूढाः** विवेकरहिताः । **भृङ्गाः** भ्रमराः । **समुत्सुकाः** उत्पलास्वादोत्कण्ठिताः सन्तः । **विपत्रपुष्पां** विगतानि पत्राणि येषां तादृशानि पुष्पाणि यस्याः तां । **नलिनीं** कमलिनीं । **विहाय** परित्यज्य । **प्रनृत्यतां** नर्तनं कुर्वतां । **शिखिनां** मयूराणां । **कलापचक्रेषु** बर्हमण्डलेषु । **नवोत्पलाशया** । नूतननीलपद्मेच्छया । **पतन्ति** गच्छन्ति । पत्लृ गताविति धातुः । भ्रान्तिमदलंकारः ॥ १४॥

वनद्विपानां नववारिदस्वनै-[6]
र्मदान्वितानां ध्वनतां[7] मुहुर्मुहुः ।
कपोलदेशा विमलोत्पलप्रभाः
सभृङ्गयूथैर्मदवारिभिश्चिताः[8] ॥ १५ ॥

वनद्विपानामिति । नववारिदस्वनैः मेघध्वनिभिः । **मदान्वितानां** प्रतिगजध्वनि-भ्रान्त्या समदानाम् । अत एव **मुहुः मुहुः ध्वनतां वनद्विपानां विमलोत्पलप्रभाः** विमलानां निर्मलानां उत्पलानां नीलकमलानां प्रभेव प्रभा येषां ते । **कपोलदेशाः** कपोलस्थानानि । **सभृङ्गयूथैः** भृङ्गवृन्दसहितैः । **मदवारिभिः** मदोदकैः । **चिताः** व्याप्ताः । वर्तन्त इति शेषः । एतत्समानार्थकम् पद्यम् 'प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः । असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः' इति रघु० ४-२३ ॥ १५ ॥

---

१ प्रफुल्लपद्मां । प्रफुल्लपत्रां । विपन्नपुष्पां । २ समुत्सुकाम् । ३ श्रुतिचारुनिस्वनाः । ४ च नृत्यताम् । ५ नवोत्पलाशयाः । ६ तोयद । ७ स्वनतां । ८ श्रिताः ।

सि[1]तोत्पलाभाम्बुदचुम्बितोपलाः
स[2]माचिताः प्रस्रवणैः स[3]मन्ततः ।
प्र[4]वृत्तनृत्यैः शिखिभिः समाकुलाः
समुत्सुकत्वं जनयन्ति भूधराः ॥ १६ ॥

सितोत्पलाभेति । सितोत्पलाभाम्बुदचुम्बितोपलाः सितोत्पलानां कुमुदानां आभेव आभा येषाम् । वृष्टिकाले मेघाः शुभ्रवर्णा लक्ष्यन्ते । तादृशाः ये अम्बुदाः तैश्चुम्बिताः उपलाः पाषाणाः येषां ते । ‘ पाषाणप्रस्तारग्रावोपलाश्मानः शिला दृषत् ’ इत्यमरः । ‘नीलोत्पलाभाम्बुदचुम्बितोपलाः ’ इत्यपि पाठः समीचीनः । प्रस्रवणैः वारिप्रवाहैः । ‘ उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः ’ इत्यमरः । समन्ततः सर्वतः । समाचिताः व्याप्ताः । प्रवृत्तनृत्यैः प्रारब्धनर्तनैः । शिखिभिः मयूरैः । समाकुलाः व्याप्ताश्च । भूधराः पर्वताः । वियोगिनां मनसीति शेषः । समुत्सुकत्वं जनयन्ति ॥ १६ ॥

क[5]दम्बसर्जार्जुनकेत[6]कीवनं
वि[7]कम्पयंस्तत्कुसुमाधिवा[8]सितः ।
सशीकराम्भोधरसङ्गशीतलः
समीरणः कं न करोति सोत्सुकम् ॥ १७ ॥

कदम्बेति । कदम्बो नीपः सर्जोऽश्वकर्णकः अर्जुनः ककुभः केतक्यश्च तासां वनं कदम्बसर्जार्जुनकेतकीवनं । विकम्पयन् विधुन्वन् । अत एव तत्कुसुमाधिवासितः । तत्कुसुमैः पूर्वोक्तवृक्षाणां कुसुमैः अधिवासितः सुगन्धीकृतः । सशीकराम्भोधरसङ्गशीतलः । सशीकराः अम्बुकणसहिताः ये अम्भोधराः तेषां सङ्गेन शीतलः । समीरणः वायुः । कं सोत्सुकं न करोति । अपि तु सर्वमपि करोतीत्यर्थः ॥ १७ ॥

शिरोरुहैः श्रोणितटावलम्बिभिः
कृतावतंसैः कुसुमैः सुगन्धिभिः ।

---

१ नीलोत्पलाभाम्बुद । सतोयनम्राम्बुद । प्रवासिनामम्बुधरोक्षितोपलाः । चुम्बितोत्पलाः । २ सुभूषिताः । ३ अपाङ्क्तिलैः । ४ प्रवृद्धनृत्यैः । ५ प्रफुल्ल । ६ नीपकेतकीः । नीपकेतकान्-कीन् । ७ उत्कम्पयन् । प्रकल्पयन् । ८ वासनः ।

स्तनैः सहारैर्वदनैः ससीधुभिः
स्त्रियो रतिं संजनयन्ति कामिनाम् ॥ १८ ॥

शिरोरुहैरिति । श्रोणितटावलम्बिभिः श्रोणितटे नितम्बदेशे अवलम्बन्ते तच्छीलैः । 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः । शिरोरुहैः शिरसि रोहन्तीति शिरोरुहाः केशाः तैः । कृताः अवतंसाः कर्णभूषणानि येषां तैः कृतावतंसैः । 'अवतंसो न स्त्रियां स्यात्कर्णपूरे च शेखरे' इति मेदिनी । शोभनो गन्धो येषां तैः सुगन्धिभिः । 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' इतीकारोऽन्तादेशः । कुसुमैः । सहारैः मुक्ताहारसहितैः । स्तनैः । ससीधुभिः सासवैः वदनैः च । 'आसवः सीधुः' इत्यमरः । स्त्रियः । कामिनां विलासिनां रतिं रागं संजनयन्ति उत्पादयन्ति ॥ १८ ॥

तडिल्लताशक्रधनुर्विभूषिताः
पयोधरास्तोयभरावलम्बिनः ।
स्त्रियश्च काञ्चीमणिकुण्डलोज्ज्वला
हरन्ति चेतो युगपत्प्रवासिनाम् ॥ १९ ॥

तडिल्लतेति । तडित् लता इव तडिल्लता विद्युल्लता । शक्रधनुः इन्द्रधनुः ताभ्यां विशेषेण भूषिताः तडिल्लताशक्रधनुर्विभूषिताः । तोयभरेण जलभारेण अवलम्बिनः नम्राः तोयभरावलम्बिनः । पयोधराः मेघाः । काञ्चीभिः रसनाभिः मणिकुण्डलैश्च उज्ज्वलाः शोभायमानाः काञ्चीमणिकुण्डलोज्ज्वलाः । स्त्रियः स्मृत्युपस्थापिताः स्वीयाः स्त्रियः । अत्र 'स्त्रियश्चात्र परकीयाः' इति केषांचिद्व्याख्यानमप्रयोजकत्वाद्धेयम् । प्रवासिनां चेतः युगपत् समकालं हरन्ति अपहरन्ति । तान्मूर्छितान्करोतीति भावः ॥ १९ ॥

मालाः कदम्बनवकेसरकेतकीभि-
रायोजिताः शिरसि बिभ्रति योषितोऽद्य ।
कर्णान्तरेषु ककुभद्रुममञ्जरीभि-
रिच्छानुकूलरचितानवतंसकांश्च ॥ २० ॥

१ सुपानैः । २ ससर्षपैः । ३ तडिल्लताः । तडिद्गुणाः । ४ स्व । ५ माला । ६ केतकीनां ७ कर्णान्तरे च । ८ मञ्जरीणाम् । ९ श्रोत्रानुकूल । नेत्रानुकूल । सूत्रानुकूल ।

माला इति । अद्य अस्मिन्नहनि । **योषितः शिरसि । कदम्बनवकेसरकेतकीभिः ।** कदम्बानि नीपकुसुमानि नवकेसराणि प्रत्यग्रबकुलपुष्पाणि केतक्यश्च ताभिः । **आयोजिताः** गुम्फिताः । **मालाः** स्रजः । **कर्णान्तरेषु** कर्णप्रान्तेषु । **ककुभद्रुममञ्जरीभिः** अर्जुनवृक्षवल्लरीभिः । 'वल्लरिर्मञ्जरिः स्त्रियौ' इत्यमरकोशान्मञ्जरिशब्दस्य ह्रस्वान्तत्वेऽपि 'कृदिकारादक्तिनः' इति ङीषि दीर्घान्तत्वमपि । **इच्छानुकूलरचितान्** । इच्छानुकूलं यथा तथा रचितान् योजितान् । **अवतंसकान्** च । अवतंसाः एव अवतंसकाः भूषणानि तान् । स्वार्थे कन् । **बिभ्रति** धारयन्ति ॥ २० ॥

कालागुरुप्रचुरचन्दनचर्चिताङ्ग्यः[1]
पुष्पावतंससुरभीकृतकेशपाशाः ।
श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे
शय्यागृहं गुरुगृहात्प्रविशन्ति नार्यः ॥ २१ ॥

कालागुरुप्रचुरेति । **कालागुरुप्रचुरचन्दनचर्चिताङ्ग्यः** । कालागुरुः कृष्णागुरुः तत्प्रचुरेण तद्भूयिष्ठेन चन्दनेन चर्चितानि लिप्तान्यङ्गानि यासां ताः । **पुष्पावतंससुरभीकृतकेशपाशाः** । पुष्पाणां अवतंसैः भूषणैः सुरभीकृताः सुगन्धीकृताः । अभूततद्भावे च्विः । च्वाविति दीर्घः । केशपाशाः केशकलापा यासां ताः । 'पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे' इत्यमरः । **नार्यः प्रदोषे** निशारम्भे । **जलमुचां** मेघानां । **ध्वनिं श्रुत्वा गुरुगृहात्** श्वशुराद्यधिष्ठितगृहात् । **शय्यागृहम्** शयनगृहम् । पत्युरिति शेषः । **त्वरितं** शीघ्रं **प्रविशन्ति** ॥ २१ ॥

कुवलयदलनीलै[2]रुन्नतै[3]स्तोयनम्रै[4]-
र्मृदुपवनविधूतै[5]र्मन्दमन्दं चलद्भिः ।
अपहृतमिव चेतस्तोयदैः सेन्द्रचापैः[6]
पथिकजनवधूनां तद्वियोगाकुलानाम्[7] ॥ २२ ॥

कुवलयेति । **कुवलयदलनीलैः** इन्दीवरपत्रश्यामैः **उन्नतैः** उच्चैः **तोयनम्रैः** । जलाभरावलम्बिभिः । **मृदुपवनविधूतैः** मृदुना मन्देन पवनेन वायुना विधूतैः मन्दमन्दं ईषन्मन्दम् । 'प्रकारे गुणवचनस्य' इति द्विर्भावः । अत्र वामनः ।

---

१ चर्चिताङ्गाः । २ दललीलैः । ३ उद्धतैः । ४ स्तोकनम्रैः । ५ विशेषा । ६ स्तोकनम्रैः । ७ तद्वियोगक्षतानाम् ।

'प्रकारार्थत्वे तु प्रकारे गुणवचनस्येति द्विर्वचने कृते कर्मधारयवद्भावे मन्दमन्दामिति प्रयोगः' इति। चलद्भिः संचरद्भिः। सेन्द्रचापैः शक्रधनुस्सहितैः तोयदैः। तेषाम् तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात्पथिकानामित्यर्थः यः वियोगः तेन आकुलानां तद्वियोगाकुलानां। पथिकजनवधूनां पान्थजनस्त्रीणां चेतः। अपहृतम् इव चोरितमिव ॥ २२ ॥

मुदित इव कदम्बैर्जातपुष्पैः समन्ता-
त्पवनचलितशाखैः शाखिभिर्नृत्यतीव।
हसितमिव विधत्ते सूचिभिः केतकीनां
नवसलिलनिषेकच्छिन्नतापो वनान्तः ॥ २३ ॥

मुदित इति। नवसलिलनिषेकाच्छिन्नतापः नवसलिलनिषेकेण नूतनजलाभिवर्षणेन छिन्नः तापः यस्य सः। वनान्तः वनप्रदेशः। समन्तात् सर्वतः। जातपुष्पैः उद्भूतकुसुमैः। कदम्बैः। मुदित इव। पवनचलितशाखैः पवनेन चलिताः कम्पिताः शाखाः येषां तैः। शाखिभिः वृक्षैः। नृत्यतीव नर्तनं करोतीव। केतकीनां सूचिभिः गर्भपत्रैः। हसितं हास्यं। विधत्ते इव करोतीव। अत्र जातपुष्पैः कदम्बैः इत्यनेन हर्षोद्भूतरोमाञ्चोद्गमः पवनचलितशाखैः इत्यनेन नर्तकस्य हस्ताभिनयः केतकीनां सूचिभिः इत्यनेन केतकीसूचीनां स्वभावतो धवलत्वात् तत्तुल्यं हसितं च व्यज्यते ॥ २३ ॥

शिरसि बकुलमालां मालतीभिः समेतां
विकसितनवपुष्पैर्यूथिकाकुड्मलैश्च।
विकचनवकदम्बैः कर्णपूरं वधूनां
रचयति जलदौघः कान्तवत्काल एषः ॥ २४ ॥

शिरसीति एषः जलदौघः जलदानां मेघानां ओघः समुदायः यस्मिन्सः। कालः वर्षाकाल इति यावत्। कान्तवत्। कान्तेन तुल्यम्। मालतीभिः मालतीपुष्पैः। विकासितनवपुष्पैः। उत्फुल्लनूतनकुसुमैः। यूथिकाकुड्मलैः लोके 'जुई' इति प्रसिद्धलताकोरकैः च समेतां युक्तां बकुलमालां। वधूनां

---

१ जाति। २ सूतिभिः। ३ निषेकात्। ४ शान्ततापः। खाततापः। ५ कुसुमितवनपुष्पैः। कुसुमितनवपुष्पैः। ६ जालकैश्च।

स्त्रीणां । शिरसि । तथा विकचनवकदम्बैः प्रफुल्लनूतनकदम्बपुष्पैः कर्णपूरं कर्णावतंसं च रचयति कारयतीत्यर्थः ॥ २४ ॥

दधति वर[1]कुचाग्रैरुन्नतैर्हारयष्टिं
[2]प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः ।
नवजल[3]कणसेकादुद्गतां[4] रोमराजीं[5]
[6]ललितवलिविभङ्गैर्मध्य[7]देशैश्च[8] नार्यः ॥ २५ ॥

दधतीति । नार्यः । उन्नतैः उच्चैः । वरकुचाग्रैः श्रेष्ठस्तनाग्रैः । हारयष्टिं मुक्ताहारलताम् । आयतैः विस्तृतैः । श्रोणिबिम्बैः नितम्बदेशैः । प्रतनुसितदुकूलानि सूक्ष्मश्वेतक्षौमाणि । ललितवलिविभङ्गैः ललिताः मनोहराः वलिविभङ्गा वलिरचनाः येषु तैः । मध्यदेशैः । नवजलकणसेकात् । उद्गतां उत्थितां अभिव्यक्तामिति यावत् । रोमराजीं रोमाञ्चपङ्क्तिं च दधति धारयन्ति ॥ २५ ॥

नवजलकण[9]सङ्गाच्छीततामादधानः
कुसुमभरनतानां लासकः[10] पादपानाम् ।
जनितरुचिर[11]गन्धः केतकीनां रजोभिः
परि[12]हरति नभस्वान्प्रोषिता[13]नां मनांसि ॥ २६ ॥

नवजलेति । नवजलकणसङ्गात् नवानां जलकणानां सङ्गात् शीतताम् आदधानः धारयन् । कुसुमभरनतानां पुष्पभारावनम्राणां । पादपानां तरूणां लासकः नर्तकः । केतकीनां रजोभिः परागैः । जनितरुचिरगन्धः जनितः उत्पादितः रुचिरगन्धः यस्य सः नभस्वान् वायुः । प्रोषितानां प्रवासिनां मनांसि । परिहरति परितः हरति चोरयतीत्यर्थः ॥ २६ ॥

जलभर[14]नमितानामाश्रयोऽस्माकमुच्चै-
रयमिति जलसेकैस्तोयदास्तोयनम्राः ।

---

१ पृथुकुचाग्रैः । कुचयुगाग्रैः । २ रुचिरतर । ३ नव । ४ उन्नताम् । ५ राजिम् । ६ त्रिवलिवलिविभङ्गैः । ललितवलिविभागैः । त्रिवलिवलित—ललितशोभाम् । त्रिवलिजनितशोभैः । ७ मध्यदेशैः । ८ तु । ९ सेकात् । १० लालसः । नाशकः । नाथकः । ११ सुरभि । १२ व्यवहरति । अवहरति । १३ योषितानाम् । १४ जलभराविनतानाम् ।

अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः
समुपजनिततापं ह्लादयन्तीव विन्ध्यम् ॥ २७ ॥

जलभरेति। जलभरनमितानां उदकभारनम्राणां। अस्माकं अयं पुरो दृश्यमानः विन्ध्यः। उच्चैः महान् आश्रयः। इति हेतोः इव। तोयनम्राः। तोयदाः। अतिशयपरुषाभिः अतिशयेन परुषाभिः उग्राभिः ग्रीष्मवह्नेः दवाग्नेः शिखाभिः ज्वालाभिः समुपजनिततापं। समुपजनितः उत्पादितः तापः यस्य तं। विन्ध्यं तन्नामानं पर्वतं जलसेकैः उदकोक्षणैः ह्लादयन्तीव आनन्दयन्तीव॥ २७ ॥

बहुगुणरमणीयः कामिनीचित्तहारी[1][2]
तरुविटपलतानां बान्धवो निर्विकारः ।
जलदसमय एष प्राणिनां प्राणभूतो[3][4][5]
दिशतु तव हितानि प्रायशो वाञ्छितानि ॥ २८॥

बहुगुणेति। बहुगुणरमणीयः। कामिनीचित्तहारी कामिनीनां स्त्रीणां चित्तं हृदयं हरति तच्छीलः। तरुविटपलतानां तरुविटपाः वृक्षशाखा लताश्च तासाम्। निर्विकारः दवाग्न्यादिविकाररहितः। बान्धवः। अकारणबन्धुरित्यर्थः। प्राणिनां जनानां। प्राणभूतः प्राणसदृशः। एषः जलदसमयः वर्षर्तुः। तव हितानि वाञ्छितानि इच्छितानि प्रायशः बाहुल्येन दिशतु ददातु॥ २८ ॥

---

१ इति बहुगुणरम्यः। २ योषिताम्। कामिनाम्। ३ एषाम्। ४ प्राणिनः। ५ प्राणहेतुः।

इति बालबोधिनीटीकासहितस्य ऋतुसंहारस्य काव्यस्य
प्रावृड्वर्णनं नाम द्वितीयः सर्गः ॥

तृतीयः सर्गः ।

अथ क्रमागतं शरदृतुं वर्णयति—

काशांशुका विकचपद्ममनोज्ञवक्त्रा
सोन्मादहंसरव[1]नूपुरनादरम्या ।
आपक्वशालिरु[2]चिरानत[3]गात्रयष्टिः
प्राप्ता शरन्नवधूरिव रू[4]परम्या ॥ १ ॥

काशांशुकेति । **काशांशुका** काशमेव काशपुष्पमेवांशुकं वसनं यस्याः सा । पक्षे काशमिवांशुकं यस्याः सा । **विकचपद्ममनोज्ञवक्त्रा** । विकचं प्रफुल्लं पद्ममेव मनोज्ञं वक्त्रं यस्याः सा । पक्षे विकचपद्ममिव मनोज्ञं वक्त्रं यस्याः सा । **सोन्माद-हंसरवनूपुरनादरम्या** । सोन्मादानां समदानां हंसानां रव एव नूपुरनादः तेन रम्या । पक्षे सोन्मादहंसरव इव नूपुरनादस्तेन रम्या । **आपक्वशालिरुचिरान-तगात्रयष्टिः** । आपक्वा आसमन्तात्परिपक्वा ये शालयः त एव रुचिरा सुन्दरा आनता ईषन्नम्रा गात्रयष्टिः तनुलता यस्याः सा । पक्षे आपक्वशालय इव रुचिरानत-गात्रयष्टिर्यस्याः सा । रुचिरातनुगात्रयष्टिरित्यपपाठः । रुचिराशब्दस्य पुंवद्भावेन 'रुचिरतनु०' इति प्रयोगात् । रुचिरा आतनुः इत्यादिविग्रहप्रदर्शनेनोपप-त्तिस्तु क्लिष्टा कवेरसंमता च । **रूपरम्या** । रूपेण रम्या । रम्यरूपा इति पाठः प्रक्रान्तबहुव्रीह्यनुगुणत्वात्साधीयान् । **नववधूरिव** नवोढेव शरत् प्राप्ता ॥ १ ॥

काशैर्मही शिशिरदीधितिना रजन्यो
हंसैर्जलानि सरितां कुमुदैः सरांसि ।
सप्तच्छदैः कुसुमभारनतैर्वनान्ताः
शुक्लीकृतान्युपवनानि च मालतीभिः ॥ २ ॥

---

१ रुत । २ ललिता । ३ तनु । ४ हारिरूपा ।

काशैरिति । काशैः काशपुष्पैः । मही भूमिः । शिशिरदीधितिना चन्द्रेण । रजन्यः निशाः । हंसैः सरितां निम्नगानां । जलानि । कुमुदैः श्वेतोत्पलैः । सरांसि । कुसुमभारनतैः कुसुमभारेण पुष्पभारेण नतैः नम्रैः । सप्तच्छदैः लोके 'सातवण' इति प्रसिद्धैर्वृक्षैः । वनान्ताः । मालतीभिः मालतीपुष्पैः । उपवनानि कृत्रिमवनानि च शुक्लीकृतानि शुभ्रीकृतानि ॥ २ ॥

चञ्चन्मनोज्ञशफरीरसनाकलापाः
पर्यन्तसंस्थितसिताण्डजपङ्क्तिहाराः ।
नद्यो विशालपुलिनान्तनितम्बबिम्बा
मन्दं प्रयान्ति समदाः प्रमदा इवाद्य ॥ ३ ॥

चञ्चन्मनोज्ञेति । चञ्चन्मनोज्ञशफरीरसनाकलापाः । चञ्चन्त्यः स्फुरन्त्यः मनोज्ञा मनोहराः शफर्यः मत्स्यविशेषाः एव रसनाकलापाः काञ्चीभूषणानि यासां ताः । पक्षे चञ्चन्मनोज्ञशफर्य इव काञ्चीकलापा यासां ताः । पर्यन्तसंस्थित-सिताण्डजपङ्क्तिहाराः । पर्यन्ते परिसरे संस्थितानामुपविष्टानां सिताण्डजानां हंसानां पङ्क्तय एव हारा यासां ताः । विशालपुलिनान्तनितम्बबिम्बाः विशालाश्च ते पुलिनान्ताः पुलिनप्रदेशास्त एव नितम्बबिम्बा यासां ताः । पक्षे विशालपुलिनान्ता इव नितम्बबिम्बा यासां ताः । प्रमदा इव । कामिन्य इव नद्यः । अद्य संप्रति । मन्दं । प्रयान्ति गच्छन्ति ॥ ३ ॥

व्योम क्वचिद्रजतशङ्खमृणालगौरै-
स्त्यक्ताम्बुभिर्लघुतया शतशः प्रयातैः ।
संलक्ष्यते पवनवेगचलैः पयोदै
राजेव चामरशतैरुपवीज्यमानः ॥ ४ ॥

व्योमेति । त्यक्ताम्बुभिः त्यक्तान्युज्झितान्यम्बूनि जलानि यैस्तैः । अत एव रजतशङ्खमृणालगौरैः रजतशङ्खमृणालानीव गौरैः धवलैः । लघुतया लघुत्वेन । शतशः प्रयातैः । पवनवेगचलैः पवनवेगेन चलैः चञ्चलैः । पयोदैः वारिदैः ।

---

१ वल्ग । २ भक्ति । ३ पुलिनोरु । ४ देशा । ५ वीताम्बुभिः । मुक्ताम्बुभिः । ६ उत्प्रेक्षते । उत्प्रेक्ष्यते । ७ चामरवरैः । ८ अपि वीज्यमानः । अभिवीज्यमानः ।

व्योम गगनं । चामरशतैः । उपवीज्यमानः राजा इव । संलक्ष्यते संदृश्यते । चामरवैरैरिति पाठे शतशः प्रयातैरिति तस्यापि विशेषणमिति ज्ञेयम् ॥ ४ ॥

भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं
बन्धूकपुष्परजसाऽरुणिता च भूमिः ।
वप्राश्च पक्वकलमावृतभूमिभागाः
प्रोत्कण्ठयन्ति न मनो भुवि कस्य यूनः ॥ ५ ॥

भिन्नाञ्जनेति । **भिन्नाञ्जनप्रचयकान्ति** । भिन्नाञ्जनप्रचयस्य मर्दितकज्जलराशेः कान्तिरिव कान्तिर्यस्य तत् । **मनोज्ञं नभः** अन्तरिक्षम् । **बन्धूकपुष्परजसा अरुणिता** बन्धूकपुष्पपरागैः रक्तीकृता **भूमिः** । **पक्वकलमावृतभूमिभागाः** पक्वकलमैः आवृता आच्छादिताः भूमिभागा येषां ते । **वप्राः** प्राकाराश्च । अत्र वप्रभूमिभागे कमलानामसंभवात् 'चारुकमलावृत' इति पाठः न समीचीनः । कमलशब्देन स्थलकमलं वा ग्राह्यम् । **भुवि** अस्मिन् भूलोके । **कस्य यूनः** तरुणस्य **मनः न प्रोत्कण्ठयन्ति** प्रोत्सुकयन्ति ? अपि तु सर्वस्यापीत्यर्थः ॥ ५ ॥

मन्दानिलाकुलितचारुतराग्रशाखः
पुष्पोद्गमप्रचयकोमलपल्लवाग्रः ।
मत्तद्विरेफपरिपीतमधुप्रसेक-
श्चित्तं विदारयति कस्य न कोविदारः ॥ ६ ॥

मन्दानिलेति । **मन्दानिलाकुलितचारुतराग्रशाखः** मन्दानिलेन मृदुपवनेन आकुलितानि चालितानि चारुतराणि अग्राणि यासां तादृश्यः शाखा यस्य सः । **पुष्पोद्गमप्रचयकोमलपल्लवाग्रः** पुष्पोद्गमस्य उद्गतपुष्पाणां प्रचयः समूहः येषु तादृशानि कोमलपल्लवाग्राणि यस्य सः । **मत्तद्विरेफपरिपीतमधुप्रसेकः** । मत्तद्विरेफैः मदान्वितभृङ्गैः परिपीतः मधुप्रसेकः मकरन्दच्युतिर्यस्य सः । प्रसेकः सेचने च्युताविति मेदिनी । **कोविदारः** कुद्दालः लोके 'काञ्चन' इति प्रसिद्धः वृक्षः । **कस्य चित्तं न विदारयति** । अपि तु सर्वस्य विदारयतीत्यर्थः ॥ ६ ॥

---

१ रचितारुणता । बन्धूकपुष्पनिकरै रुचिरा । २ चारुकमला । पक्वकलमाचित० । ३ भूरिभागाः । भूरिभागैः । ४ उत्कण्ठयन्ति । ५ चारुमनोज्ञ । चारुविशाल । सर्वमनोज्ञ । ६ प्रचुर । प्रबलकोमलपल्लवाङ्गः ।

तारागणप्रवर[1]भूषणमुद्वहन्ती
मेघावरोध[2]परिमुक्तशशाङ्कवक्त्रा ।
ज्योत्स्नादुकूलममलं रजनी दधाना[3]
वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ॥ ७ ॥

तारागणेति । **तारागणप्रवरभूषणं** तारागण एव प्रवरभूषणं श्रेष्ठाभरणं । पक्षे तारागण इव प्रवरभूषणम् । उद्वहन्ती धारयन्ती । **मेघावरोधपरिमुक्तशशाङ्कवक्त्रा** । मेघावरोधात् जलदोपरोधात् परिमुक्तः विमुक्तः शशाङ्क एव वक्त्रं यस्याः सा। पक्षे मेघावरोधपरिमुक्तशशाङ्क इव वक्त्रं यस्याः सा । **अमलं** विमलं । **ज्योत्स्नादुकूलं** ज्योत्स्ना चन्द्रिका एव दुकूलं क्षौमं पक्षे ज्योत्स्नेव दुकूलं । **दधाना** धारयन्ती । **प्रमदा** प्रकृष्टमदा । **बाला** इव । **रजनी** क्षपा **अनुदिनं** दिने दिने । वीप्सायामव्ययीभावः । **वृद्धिं** विस्तारं **प्रयाति** गच्छतीत्यर्थः ॥ ७ ॥

कारण्डवानन[4]विघट्टितवीचिमालाः
कादम्बसारसकुलाकुल[5]तीरदेशाः ।
कुर्वन्ति हंसविरुतैः परितो जनस्य
प्रीतिं सरोरुहरजोरुणितास्तटिन्यः[6] ॥ ८ ॥

कारण्डवेति । **कारण्डवाननविघट्टितवीचिमालाः** कारण्डवानां मद्गूनां 'पाणकोंबडे' इति प्रसिद्धानामाननैः चञ्चुभिः विघट्टिता विचालिता वीचिमाला ऊर्मिपरंपरा यासां ताः । **कादम्बसारसकुलाकुलतीरदेशाः** । कादम्बाः कलहंसाः सारसाः पुष्कराह्वास्तेषां कुलेन समूहेन आकुला व्याप्तास्तीरदेशास्तटप्रदेशा यासां ताः । **सरोरुहरजोरुणिताः** सरोरुहाणां सरसिजानां रजोभिः परागैः अरुणिताः कपिलीकृताः । 'अरुणोऽव्यक्तरागेऽर्के...निःशब्दे कपिले' इति मेदिनी । **तटिन्यः** नद्यः **हंसविरुतैः परितः** सर्वतः **जनस्य प्रीतिं कुर्वन्ति** ॥ ८ ॥

---

१ प्रचुर । २ मेघोपरोध । ३ वसाना । ४ कारेणुवैरभिविघट्टित । मारेणुनाहवाविघट्टित । ५ चयाकुल । ६ सरोरुहरजोरुणिताश्च नद्यः । परां कमलरेणुवृतास्तटिन्यः । मनोज्ञकमलारुणिताश्च नद्यः ।

नेत्रोत्सवो हृदयहारिमरीचिमालः
प्रह्लादकः[2] शिशिरशीकरवारिवर्षी ।
पत्युर्वियोगविषदिग्धशरक्षतानां
चन्द्रो दहत्यतितरां[3] तनुमङ्गनानाम् ॥ ९ ॥

नेत्रोत्सव इति । **नेत्रोत्सवः** नेत्राणां नयनानामुत्सव आनन्दो यस्मात् सः । **हृदयहारिमरीचिमालः** हृदयहारिणी मरीचिमाला मयूखपरंपरा यस्य सः । **प्रह्लादकः** हर्षजनकः । **शिशिरशीकरवारिवर्षी** ।शिशिरं शीतं यत् शीकरवारि हिमोदकं तद् वर्षति तच्छीलः । **चन्द्रः** इन्दुः । **पत्युः** भर्तुः । **वियागविषदिग्धशरक्षतानां** वियोग एव विषदिग्धशरः गरलाक्तबाणस्तेन क्षताः विद्धाः तासाम् । सापेक्षत्वेऽपि गमकत्वात् समासः । **अङ्गनानां** योषितां । **तनुं** देहं । **अतितरां दहति** । विरहिणीनां चन्द्रः तापदो भवतीति प्रसिद्धम् ॥ ९ ॥

आकम्पयन्फलभरानतशालिजाला-
न्यानर्तयंस्तरुवरान्[4][5]कुसुमावनम्रान् ।
उत्फुल्लपङ्कजवनां[6] नलिनीं विधुन्व-
न्यूनां मनश्चलयति[7] प्रसभं नभस्वान् ॥ १० ॥

आकम्पयन्निति। **फलभरानतशालिजालानि** फलभरेण आनतानि विनम्राणि शालिजालानि शालिसमुदायान् । **आकम्पयन्** । **कुसुमावनम्रान्** कुसुमैः पुष्पैरवनम्रान् **तरुवरान्**। तरुश्रेष्ठान् । **आनर्तयन्** ।**उत्फुल्लपङ्कजवनां** उत्फुल्लानि विकचानि पङ्कजवनानि कमलसमूहा यस्यास्ताम्। **नलिनीं** कमलिनीं। **विधुन्वन्** विशेषेण कम्पयन्। **नभस्वान्** पवनः । **यूनां** तरुणानां **मनः** । **प्रसभं** बलात्कारेण । **चलयति** कम्पयति । घटादित्वेन मित्वाद्ध्रस्वः । यद्वा चलं करोति । ' तत्करोति तदाचष्टे ' इति णिच् । विवेकविधुरं करोतीत्यर्थः ॥ १० ॥

सोन्मादहंसमिथुनैरुपशोभितानि[1]
स्वच्छप्रफुल्लकमलोत्पलभूषितानि[8] ।

---

१ गौरैः । २ प्रह्लादयन् शिशिरशीकरवारिवर्षैः । ३ भनुदिनम् । रुजत्यनुदिनम् । ४ जालम् । जालान् । ५ तरुवरान् । कुरबकान् । ६ प्रोत्फुल्ल । प्रोत्फुल्लपङ्कजवतीम् । ७ सवलयति । मदयति । ८ स्वच्छानिचारु स्वच्छातिफुल्ल ।

मन्दप्रभातपवनोद्धतवीचिमाला-
न्युत्कण्ठयन्ति सहसा हृदयं सरांसि ॥ ११ ॥

सोन्मादेति । **सोन्मादहंसमिथुनैः** सोन्मादानां मदोन्मत्तानां हंसानां मिथुनैः द्वन्द्वैः । **उपशोभितानि** अलंकृतानि । **स्वच्छप्रफुल्लकमलोत्पलभूषितानि** । स्वच्छानि विमलानि प्रफुल्लानि च यानि कमलानि पद्मानि उत्पलानि कुवलयानि च तैर्भूषितानि । **मन्दप्रभातपवनोद्धतवीचिमालानि** । मन्देन प्रभातपवनेन प्राभातिकवायुना उद्धता वीचिमाला येषां तानि । **सरांसि** । वियुक्तानामिति शेषः । **हृदयं** । **सहसा** अतर्कितं । **उत्कण्ठयन्ति** उत्सुकयन्ति ॥११॥

नष्टं धनुर्बलभिदो जलदोदरेषु
सौदमिनी स्फुरति नाद्य वियत्पताका ।
धुन्वन्ति पक्षपवनैर्न नभो बलाकाः
पश्यन्ति नोन्नतमुखा गगनं मयूराः ॥ १२ ॥

नष्टमिति । **अद्य** अस्यां शरदि **बलभिदः** शक्रस्य । **धनुः** **जलदोदरेषु** मेघकुक्षिषु **नष्टं** तिरोहितम् । **वियत्पताका** । वियतो नभसः पताकेव वैजयन्तीव पताका । **सौदमिनी** विद्युत् । **न स्फुरति** न विद्योतते । 'तेनैकदिक्' इति सूत्रेण सौदामनीति शब्दः साधुः । **बलाकाः** बिसकण्ठिकाः । **पक्षपवनैः** पतत्रवातैः । **नभ** आकाशं । **न धुन्वन्ति** न वीजयन्तीति यावत् । **मयूराः** कलापिनः । **उन्नतमुखाः** उद्ग्रीवाः सन्तः । **गगनं** अन्तरिक्षं **न पश्यन्ति** । सजलमेघानामभावादिति भावः ॥ १२ ॥

नृत्यप्रयोगरहिताञ्शिखिनो विहाय
हंसानुपैति मदनो मधुरप्रगीतान् ।

---

१ मन्दं प्रभात । मन्दप्रचार । मन्दप्रवाह । २ पवनोद्धृत । ३ उत्कम्पयन्ति । ४ प्रसभं हृदयम् । हृदयं सहसा । ५ जलदोदकेषु । ६ नापि । ७ चोन्नतमुखा । नोद्गतमुखा । नोद्धतमुखा । ८ प्रतीतान् ।

मुक्त्वा[1] कदम्बकुटजार्जुनसर्जनीपा-[2]
न्सप्तच्छदानुपगता कुसुमोद्गमश्रीः[3] ॥ १३ ॥

नृत्यप्रयोगेति । मदनः । नृत्यप्रयोगरहितान् नर्तनव्यापाररहितान् । शिखिनः मयूरान् । विहाय । मधुरप्रगीतान् मधुरं प्रगीतं कूजितं येषां तान् । हंसान् । उपैति प्राप्नोति । शरदि हंसानां मदातिरेकात् । उक्तं च अस्यां शरदि ' सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः । निपतन्ति धार्तराष्ट्राः ' इति वेणी० अं० १ । कुसुमोद्गमश्रीः पुष्पोद्भवशोभा । कदम्बकुटजार्जुनसर्जनीपान् कदम्बः प्रियकः ' नीपप्रियककदम्बास्तु ' इत्यमरः । कुटजः भाषायां ' कुडा ' इति प्रसिद्धः । अर्जुनः ककुभः । सर्जः सालवृक्षः । नीपः बन्धूकः । ' नीपः कदम्बबन्धूक ' इति मेदिनी । तान् । मुक्त्वा । सप्तच्छदान् सप्तपर्णान् । उपगता प्राप्ता । एतत्समानार्थकौ श्लोकौ ' समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम् । शरदि हंसरवाः परुषीकृतस्वरमयूरमयू रमणीयताम् ' शिशु० ६-४४ । तनुरुहाणि पुरो विजितध्वनेः धवलपक्षविहङ्गमकूजितैः । जगलुरक्षमयेव शिखण्डिनः परिभवोऽरिभवो हि सुदुःसहः । शिशु० ६-४५ ॥ १३ ॥

शेफालिकाकुसुमगन्ध[4]मनोहराणि
स्वस्थ[5]स्थिताण्डजकुल[6]प्रतिनादि[7]तानि ।
पर्यन्तसंस्थितमृगीनयनोत्पलानि
प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसाम्[8] ॥ १४ ॥

शेफालिकेति । शेफालिकाकुसुमगन्धमनोहराणि । शेफालिकायाः निर्गुण्ड्याः कुसुमानां गन्धेन मनोहराणि । स्वस्थस्थिताण्डजकुलप्रतिनादितानि । स्वस्थं निरुपद्रवं यथा तथा स्थितानामण्डजानां पक्षिणां कुलैः समूहैः प्रतिनादितानि शब्दितानि । पर्यन्तसंस्थितमृगीनयनोत्पलानि । पर्यन्तसंस्थितानां मृगीणां नयनान्येवोत्पलानि येषु तानि । उपवनानि कृत्रिमवनानि । पुंसां मनांसि । उत्कण्ठयन्ति उत्सुकयन्ति ॥ १४ ॥

---

१ त्यक्त्वा । २ नीपवृक्षान् । ३ द्रुतश्रीः । ४ राग । ५ शाखास्थित । कच्छस्थित । सुस्थस्थित । स्वच्छस्थित । ६ गण । ७ प्रतिवादितानि । ८ यूनाम् ।

कह्लारपद्मकुमुदानि[1] मुहुर्विधुन्वं-
स्तत्संगमादधिकशीतलतामुपेतः[3] ।
उत्कण्ठयत्यातितरां पवनः प्रभाते
पत्रान्तलग्नतुहिनाम्बुविधूयमानः ॥ १५ ॥

कह्लारेति । कह्लारपद्मकुमुदानि। सौगन्धिकनलिनकैरवाणि । मुहुः पुनः पुनः । विधुन्वन् कम्पयन् । तत्संगमात् तेषां कह्लारादीनां संगमात् संश्लेषात् । अधिकशीतलतां प्रचुरशीततां । उपेतः प्राप्तः । कह्लारादीनां पवनशीततासंपादकत्वं । अस्मिन्सर्गे २२ श्लोके 'कुमुदसङ्गाद्वायवो वान्ति शीताः' इत्यत्राप्युक्तम्। प्रभाते प्रातःकाले । तरूणां । पत्रान्तलग्नतुहिनानि पत्रान्तेषु पर्णप्रान्तेषु लग्नानि सक्तानि तुहिनानि हिमानि । हरन् । पवनः । अतितरां अत्यन्तं । उत्कण्ठयति ॥ १५ ॥

संपन्नशालिनिचयावृतभूतलानि
स्वस्थस्थितप्रचुरगोकुलशोभितानि[6] ।
हंसैः ससारसकुलैः प्रतिनादितानि
सीमान्तराणि जनयन्ति नृणां प्रमोदम् ॥ १६ ॥

संपन्नेति । संपन्नशालिनिचयावृतभूतलानि संपन्नेन फलपूर्णेन शालिनिचयेन कलमसमूहेन । 'शालयः कलमाद्याश्च' इत्यमरः । आवृतानि आच्छादितानि भूतलानि येषु तानि । स्वस्थस्थितप्रचुरगोकुलशोभितानि । स्वस्थस्थितैः प्रचुरैर्बहुभिः गोकुलैः गोवृन्दैः शोभितानि । ससारसकुलैः सारसकुलसहितैः । हंसैः । प्रतिनादितानि । सीमान्तराणि क्षेत्रान्तराणि 'सीमा घाटस्थिते क्षेत्रेषु' इति मेदिनी । नृणां । प्रमोदं । जनयन्ति ॥ १६ ॥

हंसैर्जिता सुललिता गतिरङ्गनाना-
मम्भोरुहैर्विकसितैर्मुखचन्द्रकान्तिः ।

---

१ कुसुमानि । २ मुदा । ३ उपेत्य । ४ सीत्कां करोति वनिताम् । सीत्काः करोति वनिताः । सीत्कं करोति हृदयम् । ५ तुहिनाम्बुविधूयमानः—विधूननेन । तुहिनानि त्वनद्रुमाणाम् । ६ सुस्थ । सुष्ट । ७ च सारस । ८ जनप्रमोदम् ।

नीलोत्पलैर्मद[1]कलानि विलो[2]चनानि
भ्रूविभ्रमाश्च रु[3]चिरास्तनुभिस्तरङ्गैः ॥ १७ ॥

हंसैरिति । **हंसैः** । अङ्गनानां प्रशस्तान्यङ्गानि यासां तासां । अङ्गात्कल्याणे इति मत्वर्थीयो न प्रत्ययः । **सुललिता** अतिसुन्दरा । **गतिः** । **जिता** । **विकसितैः** प्रफुल्लैः । **अम्भोरुहैः** कमलैः । **मुखचन्द्रकान्तिः** 'जिता' इत्यत्राप्यनुवर्तते । **नीलोत्पलैः** नीलकमलैः । **मदकलानि** मदेन कलानि । **विलोचनानि** जितानीति लिङ्गवचनविपरिणामेनान्वयः । **तनुभिः तरङ्गैः रुचिराः भ्रूविभ्रमाः** जिताः इति लिङ्गवचनविपरिणामः । एतत्समानार्थकं पद्यम् 'उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्' इति । मेघ० श्लो० १०९ ॥ १७ ॥

श्यामा लताः कुसुमभारनतप्रवालाः
स्त्रीणां हरन्ति [4]धृतभूषणबाहुकान्तिम् ।
द[5]न्तावभासविशदस्मितचन्द्रका[6]न्तिं
क[7]ङ्केलिपुष्परु[8]चिरा नव[9]मालती च ॥ १८ ॥

श्यामा इति । **कुसुमभारनतप्रवालाः** कुसुमभारेण नतानि नम्राणि प्रवालानि किसलयानि यासां ताः । **श्यामाः लताः** प्रियङ्गुलताः । **स्त्रीणां** । **धृतभूषणबाहुकान्तिं** धृतानि भूषणानि येषु तादृशानां बाहूनां कान्तिं हरन्ति । प्रियङ्गुलताया गौरत्वात्कुसुमप्रवालानामनेकवर्णत्वात्तत्साम्यम् । उक्तं च उपमायां रसगङ्गाधरे । 'आलिङ्गितो जलधिकन्यकया सलीलं लग्नः प्रियङ्गुलतयेव तरुस्तमालः ।' इति । **कङ्केलिपुष्परुचिरा** अशोकवृक्षस्य पुष्पैः रुचिरा शोभना **नवमालती** नूतनमालतीपुष्पं । **च दन्तावभासविशदस्मित चन्द्रकान्तिं** दन्तावभासेन दन्तकान्त्या विशदं शुभ्रं स्मितं चन्द्र इव तस्य कान्तिं । हरति इति वचनविपरिणामेन सम्बन्धः ॥ १८ ॥

---

१ चलानि । २ विलोकितानि ३ सरितांः । ४ भृत । बहु । ५ दन्ते विभास । दन्तावसक्त । ६ वस्त्रकान्तिम । वक्त्रकान्तिम् । ७ बन्धूक । साशोक । ८ राचिता । ९ नवमालिका । नवमालतीव । नवमालिकेव ।

केशान्नितान्तघननीलविकुञ्चिताग्रा-[1]
नापूरयन्ति वनिता नवमालतीभिः ।
कर्णेषु च प्रवर[2]काञ्चनकुण्डलेषु[3]
नीलोत्पलानि विविधानि[4] निवेशयन्ति[5] ॥ १९ ॥

केशानिति । वनिताः स्त्रियः । नितान्तघननीलविकुञ्चिताग्रान् । नितान्तं घना निबिडाः नीलाः कृष्णवर्णाः विकुञ्चिताग्राः कुटिलाग्राश्च तान् । केशान् । नवमालतीभिः नूतनमालतीपुष्पैः । आपूरयन्ति संयोजयन्ति । प्रवरकाञ्चनकुण्डलेषु प्रवराणि श्रेष्ठानि काञ्चनकुण्डलानि सुवर्णकुण्डलानि येषु तेषु । कर्णेषु च विविधानि नीलोत्पलानि । निवेशयन्ति स्थापयन्ति ॥ १९ ॥

हारैः सचन्दनरसैः स्तनमण्डलानि
श्रोणीतटं सुविपुलं रसनाकलापैः ।
पादाम्बुजानि[6] कल[7]नूपुरशेखरैश्च
नार्यः प्रहृष्टमनसोऽद्य[8] विभूषयन्ति ॥ २० ॥

हारैरिति । प्रहृष्टमनसः प्रमुदितान्तःकरणाः । नार्यः । अद्य अस्यां शरदि । सचन्दनरसैः चन्दनरससहितैः । हारैः । स्तनमण्डलानि । रसनाकलापैः काञ्चीभूषणैः । 'कलापो भूषणे बर्हे' इत्यमरः । सुविपुलं सुविस्तृतं । श्रोणीतटं नितम्बबिम्बं । कलनूपुरशेखरैः मधुराव्यक्तशब्दवद्भिर्मञ्जीरश्रेष्ठैश्च । शेखरशब्दस्य श्रेष्ठार्थकत्वं । अत्रैव १-६ श्लोकेऽपि । पादाम्बुजानि । 'विभूषयन्ति' इति सर्वत्र संबध्यते ॥ २० ॥

स्फुटकुमुदचितानां राजहंसाश्रितानां[9]
मरकतमणिभासा वारिणा भूषितानाम्[10] ।
श्रियमतिशयरूपां व्योम तोयाशयानां
वहति विगतमेघं चन्द्रतारावकीर्णम् ॥ २१ ॥

---

१ निकुञ्चि । २ प्रचुर । प्रबल । प्रचल । ३ कुड्मलेषु । ४ रुचिराणि । विकचानि । ५ निवेशयन्ते । ६ पादाम्बुजम् । ७ वर । कनकनूपुर । कनकनिर्मितनूपुरैश्च । ८ प्रसन्नमनसः प्रविभूषयन्ते । ९ राजहंसस्थितानाम् । १० आपूरितानाम् ।

स्फुटेति । **विगतमेघं** विगताः मेघा यस्मात्तत् । **चन्द्रतारावकीर्णम्** चन्द्रश्च ताराः नक्षत्राणि च ताभिः अवकीर्णं व्याप्तं । **व्योम** गगनं । **स्फुटकुमुदचितानां** स्फुटैः फुल्लैः कुमुदैः चितानां । **राजहंसाश्रितानां** राजहंसैः आश्रितानां अधिष्ठितानां । 'राजहंसस्थितानां' इति पाठे स्थिता राजहंसा येषु तेषां इति विग्रहः । वाहिताग्न्यादित्वात्परनिपातः । **मरकतमणिभासा** मरकतां मणेः हरिन्मणेर्भा इव भाः यस्य तेन । **वारिणा** जलेन । **भूषितानां** । **तोयाशयानां** जलाशयानां । **अतिशयरूपां** अतिसुन्दरां । 'रूपं स्वभावे सौन्दर्ये' इति मेदिनी । **श्रियं** शोभां । **वहति** ॥ २१ ॥

शरदि[१] कुमुद[२]सङ्गाद्वायवो[३] वान्ति[४] शीता
विगत[५]जलदवृन्दा दिग्विभागा मनोज्ञाः ।
विगतकलुषमम्भः श्यान[६]पङ्का धरित्री
विमलकिरणचन्द्रं व्योम ताराविचित्रम् ॥ २२ ॥

शरदीति । **शरदि** । **कुमुदसंगात्** । **वायवः** । **शीताः** । **वान्ति** वहन्ति । **विगजतलदवृन्दाः** विगता जलदवृन्दा मेघसमूहा येभ्यः ते । **दिग्विभागाः** । **मनोज्ञाः** दृश्यन्ते इति शेषः । **अम्भः** जलं । **विगतकलुषं** कलुषमिति भावप्रधानो निर्देशः । **धरित्री** पृथ्वी । **श्यानपङ्का** श्यान शुष्कः पङ्को यस्यां तादृशी । **विमलकिरणचन्द्रं** विमलाः किरणा यस्य तादृशश्चन्द्रो यस्मिंस्तत् । **व्योम** गगनं । **ताराविचित्रं** ताराभिः नक्षत्रैः विचित्रं 'भवति' इति वाक्यत्रितयेऽपि संबध्यते ॥ २२ ॥

दिवसकरमयूखैर्बोध्यमानं प्रभाते
वरयुवतिमुखाभं पङ्कजं जृम्भतेऽद्य ।
कुमुदमपि गतेऽस्तं लीयते[९] चन्द्रबिम्बे[१०]
हसितमिव वधूनां प्रोषितेषु प्रियेषु ॥ २३ ॥

दिवसकरेति । **अद्य** अस्यां शरदि **प्रभाते** प्रातःकाले **दिवसकरमयूखैः** सूर्यकिरणैः । **बोध्यमानं** विकास्यमानं । **वरयुवतिमुखाभं** वरयुवतिमुखस्याभे-

---

१ सुरभि । २ कुसुम । ३ तोयात् । ४ यान्ति । ५ विशद । व्यपगतजलवृन्दा दिव्यरूपाश्च मेघाः । ६ शुष्कपङ्का । शालिपक्का । ७ शोभते । ८ कुमुदमुपगतश्रीर्ग्लापिते । ९ म्लायते । १० चन्द्रबिम्बम् ।

वाभा यस्य तत् । पङ्कजं कमलं । जृम्भते विकसति । प्रियेषु प्रोषितेषु देशान्तरं गतेषु । वधूनां कामिनीनां हसितमिव हास्यमिव चन्द्रबिम्बे । अस्तं । गते । कुमुदमपि । लीयते संकुचति ॥ २३ ॥

असितनयनलक्ष्मीं लक्षयित्वोत्पलेषु
क्वणितकनककाञ्चीं मत्तहंसस्वनेषु[2] ।
अधररुचिरशोभां बन्धुजीवे प्रियाणां[3]
पथिकजन इदानीं रोदिति भ्रान्तचित्तः[4] ॥ २४ ॥

असितेति । इदानीं अस्यां शरदि । पथिकजनः अध्वगजनः । प्रियाणां प्रेयसीनां । असितनयनलक्ष्मीं असितानां श्यामलानां नयनानां लक्ष्मीं शोभां । उत्पलेषु । नीलकमलेषु क्वणितकनककाञ्चीं क्वणिता शब्दायमाना च सा कनककाञ्ची च तां लक्षणया कनककाञ्चीक्वणितमित्यर्थः । मत्तहंसस्वनेषु । अधररुचिरशोभां अधरस्य रुचिरशोभां । बन्धुजीवे बन्धूकपुष्पे । लक्षयित्वा दृष्ट्वा । भ्रान्तचित्तः सन् रोदिति ॥ २४ ॥

स्त्रीणां विहाय[5] वदनेषु शशाङ्कलक्ष्मीं[6]
काम्यं[7] च हंसवचनं मणिनूपुरेषु ।
बन्धूककान्तिमधरेषु मनोहरेषु
क्वापि प्रयाति सुभगा शरदागमश्रीः ॥ २५ ॥

स्त्रीणामिति । सुभगा रमणीया । शरदागमश्रीः शरत्कालागमशोभा । शशाङ्कलक्ष्मीं चन्द्रशोभां स्त्रीणां वदनेषु मुखेषु । काम्यं कमनीयं । हंसवचनं हंसविरुतं । मणिनूपुरेषु बन्धूककान्ति बन्धुजीवकुसुमशोभां मनोहरेषु अधरेषु विहाय त्यक्त्वा स्थापयित्वेति यावत् । क्वापि अज्ञेयस्थानमित्यर्थः प्रयाति गच्छति ॥ २५ ॥

---

१ कान्तिम् । २ हंसी । ३ प्रियायाः । ४ भ्रान्तचेताः । ५ निधाय । विधाय । ६ लक्ष्मीः । ७ कामं तु । हास्ये विशुद्धवदने कुमुदाकरश्रीम् । हास्ये० श्रीः । ८ पुष्प ।

विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी
विकसितनवकाशश्वेतवासो[1] वसाना ।
कुमुदरुचिरकान्तिः[2] कामिनीवोन्मदेयं[3]
प्रतिदिशतु[4] शरद्वश्चेतसः[5] प्रीतिमग्र्याम्[6] ॥ २६ ॥

विकचेति । विकचकमलवक्त्रा विकचं फुल्लं कमलमेव वक्त्रं यस्याः सा । पक्षे विकचकमलमिव वक्त्रं यस्याः सा । फुल्लनीलोत्पलाक्षी फुल्लनीलोत्पले एव नेत्रे अक्षिणी यस्याः सा । पक्षे फुल्लनीलोत्पले इव अक्षिणी यस्याः सा । विकसितनवकाशश्वेतवासः विकसितानि फुल्लानि नवकाशानि नूतनकाशपुष्पाणि एव श्वेतवासः श्वेतवस्त्रं पक्षे विकसित नवकाशानीव श्वेतवासः । वसाना दधाना । कुमुदरुचिरकान्तिः कुमुदान्येव रुचिरकान्तिः यस्याः कुमदानीव रुचिरकान्तिः यस्या सा शरत् । उन्मदा उत्कटमदा कामिनीव । चेतसः चित्तस्य अग्र्यां । श्रेष्ठां प्रीतिं । दिशतु ददातु ॥ २६ ॥

---

१ विकसितनवकाशासंकुलालम्बिवस्त्रा । कुसुमितनवकाशा व्याकुलालम्बिवासा । कुसुमिततकशाखाव्याकुलालम्बिवासा । २ जनितरुचिरहासा । जनितरुचिरकान्तिः । ३ चोन्मदेयम् । चोन्मदान्धा । ४ उपदिशतु । परिदिशतु । ५ चेतसाम् । चेतसि । ६ उग्राम् ।

इति बालबोधिनीटीकासहितस्य ऋतुसंहारस्य काव्यस्य
शरद्वर्णनं नाम तृतीयः सर्गः ॥

चतुर्थः सर्गः।

क्रमप्राप्तं हेमन्तवर्णनमाह—

नवप्रवालोद्गमसस्यरम्यः[1][2]
प्रफुल्ललोध्रः परिपक्वशालिः।
विलीनपद्मः[3] प्रपतत्तुषारो
हेमन्तकालः समुपागतोऽयम्[4] ॥ १ ॥

नवेति। नवप्रवालोद्गमसस्यरम्यः नवप्रवालानां नूतनकिसलयानां उद्गमः उत्पत्तिः, सस्यानि च, तैः रम्यः। प्रफुल्ललोध्रः प्रफुल्लाः लोध्राः तन्नामकवृक्षाः यस्मिन् सः। परिपक्वशालिः परिपक्वाः परिणताः शालयः यस्मिन् सः। विलीनपद्मः विलीनानि नष्टानि पद्मानि यस्मिन् सः। प्रपतत्तुषारः प्रपतन् तुषारः हिमं यस्मिन् सः। अयम्। हेमन्तकालः। समुपागतः ॥ १ ॥

मनोहरैश्चन्दनरागगौरै-[5][6]
स्तुषारकुन्देन्दुनिभैश्च हारैः।
विलासिनीनां स्तनशालिनीनां[7]
नालंक्रियन्ते[8] स्तनमण्डलानि ॥ २ ॥

मनोहरैरिति। स्तनशालिनीनाम्। स्तनैः शालन्ते शोभन्ते ताः स्तनशालिन्यः तासाम्। विलासिनीनाम्। स्तनमण्डलानि। मनोहरैः सुन्दरैः। चन्दनरागगौरैः चन्दनरागेण गौरैः श्वेतैः। तुषारकुन्देन्दुनिभैः तुषाराश्च कुन्दानि च इन्दुश्च तैः निभाः तुल्याः तैः हारैः च। न अलंक्रियन्ते। सखीजनैरिति शेषः। तदानीं शैत्यबाहुल्यादिति भावः ॥ २ ॥

---

१ यव। २ पुष्प। ३ गतासुपद्म। नवीनपद्म। ४ प्रिये। ५ मनोरमैः। ६ कुङ्कुमरागपिङ्गैः—पिञ्जरैः। ७ नवयौवनानाम्। ८ अलंक्रियन्ते।

न बाहुयुग्मेषु विलासिनीनां
प्रयान्ति सङ्गं वलयाङ्गदानि।
नितम्बबिम्बेषु नवं दुकूलं
तन्वंशुकं पीनपयोधरेषु ॥ ३ ॥

नेति। विलासिनीनाम्। बाहुयुग्मेषु भुजयुगेषु। वलयाङ्गदानि वलयानि कङ्कणानि अङ्गदानि केयूराणि च। सङ्गं न प्रयान्ति। तदानीं शीतस्पर्शासहत्वादिति भावः। नितम्बबिम्बेषु। नवम् दुकूलम्। पीनपयोधरेषु तनु सूक्ष्मं अंशुकम् च सङ्गं न प्रयातीति वचनविपरिणामेन प्रत्येकं सम्बन्धः। दुकूलादीनां शीतत्वेन तन्वंशुकस्य शैत्यनिवारकत्वाभावेन च तयोरधारणमिति भावः ॥ ३ ॥

काञ्चीगुणैः काञ्चनरत्न[1]चित्रै-
र्नो[2] भूषयन्ति प्रमदा नितम्बान्[3]।
न नूपुरैर्हंसरुतं भजद्भिः[4]
पादाम्बुजान्यम्बुजकान्तिभाञ्जि[5] ॥ ४ ॥

काञ्चीगुणैरिति। प्रमदाः स्त्रियः। काञ्चनरत्नचित्रैः काञ्चनं सुवर्णं रत्नानि च तैः चित्रैः। काञ्चीगुणैः काञ्चीनां रसनानां गुणैः रज्जुभिः। नितम्बान् नो भूषयन्ति नालंकुर्वन्ति। हंसरुतं हंसस्वनम्। भजद्भिः सेवमानैः। नूपुरैः। अम्बुजकान्तिभाञ्जि अम्बुजानां कमलानां कान्तिं शोभां भजन्ति तानि। पादाम्बुजानि चरणसरोजानि च। न। भूषयन्तीत्यनुषज्यते ॥ ४ ॥

गात्राणि कालीयकचर्चितानि
सपत्रलेखानि मुखाम्बुजानि[7]।
शिरांसि कालागुरुधूपितानि
कुर्वन्ति[8] नार्यः सुरतोत्सवाय ॥ ५ ॥

गात्राणीति। नार्यः। सुरतोत्सवाय। गात्राणि। कालीयकचर्चितानि कालीयकेन कुङ्कुमेन चर्चितानि लिप्तानि। उक्तं च 'कालीयकक्षोदविलेपनश्रियं'

१ रक्त। २ बिम्बैः। ३ न। ४ नितम्बम्। ५ पादाम्बुजालक्तकशोभितानि। ६ भान्ति। ७ नखाम्बुजानि। ८ भवन्ति।

शिशु० १२-१४ । मुखाम्बुजानि । सपत्रलेखानि पत्ररचनासहितानि 'कस्तूरीमकरीः पयोधरयुगे गण्डद्वये च श्रियः' प्रसन्नराघवम् अ० १ श्लो० १ शिरांसि च कालागुरुधूपितानि कुर्वन्ति ॥ ५ ॥

रतिश्रमक्षा[1]मविपाण्डुवक्त्राः
संप्रा[2]प्तहर्षाभ्युदयास्तरुण्यः ।
हसन्ति[3] नोच्चैर्दशनाग्रभिन्ना-
न्प्र[4]पीड्यमानानधरानवेक्ष्य ॥ ६ ॥

रतिश्रमेति । रतिश्रमक्षामविपाण्डुवक्त्राः रतिश्रमेण क्षामाणि कृशानि विपाण्डूनि च वक्त्राणि यासां ताः । तरुण्यः । संप्राप्तहर्षाभ्युदयाः सत्योऽपि दशनाग्राभिन्नान् । दशनाग्रैः दन्तशिखरैः भिन्नान् विदीर्णान् । अत एव प्रपीड्यमानान् । अधरान् । अवेक्ष्य अवलोक्य । विचार्येति यावत् । उच्चैः । न । हसन्ति । सत्यपि हास्यकारणे हास्ये कृते अतीवाधरपीडा भविष्यतीति विचार्य हास्यं न कुर्वन्तीत्यर्थः ॥ ६ ॥

पीनस्तनोरः[5]स्थलभाग[6]शोभा-
मासाद्य तत्पीडनजातखेदः ।
तृणाग्रल[7]ग्नैस्तुहिनैः पतद्भि-
राक्रन्दतीवोषसि शीतकालः ॥ ७ ॥

पीनेति । पीनस्तनोरःस्थलभागशोभाम् पीनौ स्तनौ यस्मिन् तादृशस्य उरःस्थलभागस्य वक्षःस्थलप्रदेशस्य शोभाम् । स्वेन संपादितामिति शेषः । हेमन्तस्य सर्वप्राणिपुष्टिकारणत्वादिति भावः । आसाद्य अनुभूयेत्यर्थः । तत्पीडनजातखेदः तत्पीडनेन नायककृतेनेति भावः । जातखेदः । शीतकालः । उषसि । पतद्भिः । तृणाग्रलग्नैः तृणशिखरसक्तैः । तुहिनैः हिमबिन्दुभिः । आक्रन्दतीव आक्रोशतीव ॥ ७ ॥

---

१ क्लान्तविपाण्डुगण्डाः । २ प्राप्तेऽपि हर्षाभ्युदये । प्राप्तातिहर्षाभ्युदये । ३ नोच्चैः । ४ प्रभिन्नरागान् । अव्यक्तरागान् । ५ ०नोरुस्थल । ६ भार । ७ लग्नैः ।

प्रभूतशालिप्रसवैश्चितानि[1][2]
मृगाङ्गनायूथविभूषितानि[3] ।
मनोहरक्रौञ्चनिनादितानि
सीमान्तराण्युत्सुकयन्ति चेतः ॥ ८ ॥

प्रभूतेति । प्रभूतशालिप्रसवैः प्रभूतैः प्रचुरैः शालिप्रसवैः शालिफलैः । **चितानि** व्याप्तानि । **मृगाङ्गनायूथविभूषितानि** मृगाङ्गनानां हरिणीनां यूथैः समूहैः **विभूषितानि** । **मनोहरक्रौञ्चनिनादितानि** मनोहरैः क्रौञ्चैः निनादितानि शब्दितानि च । **सीमान्तराणि** ग्रामसीमाबहिःस्थानानि । ग्रामसीम्नि शाल्यादीनामसंभवात् । 'अन्तरम्...छिद्रात्मीयविनाबहिरवसरमध्यात्मसदृशेषु' इति मेदिनी । 'अन्तरा गृहाः । बाह्या इत्यर्थः' इति सिद्धान्तकौमुद्याम् । **चेतः उत्सुकयन्ति** ॥ ८ ॥

प्रफुल्लनीलोत्पलशोभितानि[4][5]
सोन्मादकादम्बविभूषितानि[6] ।
प्रसन्नतोयानि सुशीतलानि[7][8]
सरांसि चेतांसि हरन्ति पुंसाम्[9] **॥ ९ ॥**

प्रफुल्लेति । प्रफुल्लनीलोत्पलशोभितानि । सोन्मादकादम्बविभूषितानि । सोन्मादैः समदैः कादम्बैः कलहंसैः विभूषितानि अलंकृतानि । **प्रसन्नतोयानि** स्वच्छोदकानि । सुशीतलानि । च सरांसि । पुंसाम् । चेतांसि । हरन्ति ॥ ९ ॥

पाकं व्रजन्ती हिमजातशीतै[10]—
राधूयमाना सततं मरुद्भिः ।
प्रिये प्रियङ्गुः प्रियविप्रयुक्ता
विपाण्डुतां याति विलासिनीव ॥ १० ॥

कश्चिन्नायकः स्वप्रियां वक्ति—पाकमिति । हे प्रिये पाकं पक्वतां **व्रजन्ती** गच्छन्ती । हिमजातशीतैः तुहिनसमूहशीतलैः । **मरुद्भिः** पवनैः । **सततम्** ।

---

१ प्रसूति । २ प्रचयैः । ३ विलासितानि । ४ प्रभूत । ५ भूषितानि । ६ सहंसकादम्ब- शरारिकदम्ब । शरादिकादम्बविघट्टितानि । ७ प्रफुल्ल । ८ सशाद्वलानि । ९ यूनाम् । १० पातशीतैः । शीतपातैः । सङ्गशीतैः ।

आधूयमाना आकम्पिता प्रियङ्गुः लताविशेषः । प्रियविप्रयुक्ता प्रियेण कान्तेन विप्रयुक्ता वियुक्ता । विलासिनीव कामिनीव । विपाण्डुतां याति ॥ १० ॥

पुष्पा[1]सवामो[2]दसुगन्धिवक्त्रो
निःश्वासवातैः सुरभीकृताङ्गः[3] ।
परस्पराङ्गव्यति[4]षङ्गशायी
शेते जनः कामर[5]सानुविद्धः ॥ ११ ॥

पुष्पासवेति । पुष्पासवामोदसुगन्धिवक्त्रः पुष्पासवस्य आमोदेन सुगन्धि वक्त्रं यस्य सः । निःश्वासवातैः नायिकानिःश्वासमारुतैः । सुरभीकृताङ्गः सुरभीकृतं अङ्गं यस्य सः । कामरसानुविद्धः मदनरसपूर्णः । जनः । परस्पराङ्गव्यतिषङ्गशायी परस्परयोः अन्योन्ययोः अङ्गव्यतिषङ्गः अङ्गसंश्लेषः यस्मिन्कर्मणि यथा तथा शेते तच्छीलः सन् । शेते स्वपिति ॥ ११ ॥

दन्तच्छदैः स[6]व्रणदन्तचिह्नैः
स्तनैश्च पा[7]ण्यग्रकृताभिलेखैः ।
संसूच्यते निर्दयमङ्गनानां
रतो[8]पभोगो नवयौवनानाम् ॥ १२ ॥

दन्तच्छदैरिति । सव्रणदन्तचिह्नैः । व्रणेन क्षतेन सहितानि दन्तचिह्नानि येषु तैः । दन्तच्छदैः अधरैः । पाण्यग्रकृताभिलेखैः पाण्यग्रैः नखैः कृतः अभिलेखः व्रणचिह्नं येषु तैः । स्तनैः च । नवयौवनानाम् । तरुणीनाम् । निर्दयम् निष्करुणं । रतोपभोगः । सुरतोपभोगः संसूच्यते सम्यग्बोध्यते ॥१२॥

काचिद्विभूषयति द[9]र्पणसक्तहस्ता
बाला[10]तपेषु वनिता वदनारविन्दम् ।
दन्तच्छदं प्रिय[11]तमेन निपीतसारं
दन्ताग्रभिन्नम[12]वकृष्य निरीक्षते च[13] ॥ १३ ॥

---

१ रत्युत्सवामोद । २ आमोदि । ३ कृतान्तः । ४ व्यतिसक्त । प्रतिभिन्नदेहः । ५ शरानुविद्धः । ६ दन्तविघाताचिह्नैः । ७ पानैः सुरताभिलाषैः । ८ रतोपयोगः । ९ युक्त । १० बाला विलोलचिकुरं वदनारविन्दम् । ११ प्रियतमैश्च । १२ अपकृष्य । अनुकृष्य । १३ अन्या ।

काचिदिति । दर्पणसक्तहस्ता दर्पणे आदर्शे सक्तः हस्तः यस्याः सा । काचित् अनिर्दिष्टनाम्नी । **वनिता** । **बालातपेषु** । उपविष्टा सतीति शेषः । **वदनारविन्दम्** मुखकमलम् । **विभूषयति** । तिलकादिना अलंकरोति । **प्रियतमेन** रमणेन । **निपीतसारम्** निपीतः सारः स्थिरांशः यस्य तं । **दन्तच्छदम्** अधरोष्ठम् । **अवकृष्य** आकृष्य । **निरीक्षते च** विलोकयति च ॥ १३ ॥

अन्या[1] प्रकामसुरतश्रमखिन्न[2]देहा
रात्रि[3]प्रजागरविपाटलनेत्रपद्मा[4] ।
स्रस्तां[5]सदेश[6]लुलिताकुलकेशपाशा
निद्रां प्रयाति[7] मृदुसूर्यकरा[8]भितप्ता ॥ १४ ॥

अन्या इति । **प्रकामसुरतश्रमखिन्नदेहा** प्रकामं यथेष्टं यत् सुरतं तस्य श्रमेण खिन्नः देहः यस्याः सा । **रात्रिप्रजागरविपाटलनेत्रपद्मा** रात्रौ यः प्रजागरः निद्राक्षयः तेन विपाटले आरक्ते नेत्रपद्मे यस्याः सा । **स्रस्तांसदेशलुलिताकुलकेशपाशा** स्रस्ते श्रमेण गलिते अंसदेशे भुजशिरसि लुलितः लुठितः आकुलो व्यस्तः केशपाशः केशकलापः यस्या सा । **अन्या** । **मृदुसूर्यकराभितप्ता** मृदुभिः कोमलैः सूर्यकरैः सूर्यकिरणैः । अभितप्ता सती निद्राम् । **प्रयाति** ॥१४॥

निर्माल्यदाम परिभुक्त[9]मनोज्ञगन्धं[10]
मूर्ध्नोऽपनीय घननीलशिरोरुहान्ताः[11] ।
पीनोन्नत[12]स्तनभरानतगात्रयष्ट्यः
कुर्वन्ति केशरचनामपरा[13]स्तरुण्यः ॥ १५ ॥

निर्माल्येति । **घननीलशिरोरुहान्ताः** घनाः सान्द्राः नीलाः कृष्णवर्णाश्च शिरोरुहान्ताः केशान्ताः यासां ताः । **पीनोन्नतस्तनभरानतगात्रयष्ट्यः** पीनोन्नतस्तनानां भरेण आनता ईषन्नम्रा गात्रयष्ट्यः यासां ताः । **अपराः** । **तरुण्यः** । **परिभुक्तमनोज्ञगन्धम्** परिभुक्तः उपभुक्तः मनोज्ञः रुचिरः गन्धः यस्य

---

१ अन्याः । २ भिन्न । ३ नक्त । नक्तम् । रात्रि । ४ पद्माः । युग्माः । ५ शय्यान्तरेषु । स्कन्धाङ्गदेश । ६ ललित । ७ प्रयान्ति । ८ अभितप्ताः । दिननाथकराभितप्ताः ९ पारिभूत । परिमुक्त । १० गन्धान् । ११ न्तान् । १२ पीनस्तनोल्लसितसुन्दरगात्रवल्ल्यः । १३ अबलाः ।

तत् । निर्माल्यदाम निर्माल्यभूतां पुष्पस्रजम् । मूर्ध्नः । मस्तकात् अपनीय उद्धृत्य । केशरचनाम् केशप्रसाधनं । कुर्वन्ति ॥ १५ ॥

अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं
हर्षान्विता विरचिताधरचारुशोभा ।
कूर्पासकं परिदधाति नखक्षताङ्गी
व्यालम्बिनीलललितालककुञ्चिताक्षी ॥ १६ ॥

अन्येति । प्रियेण परिभुक्तम् । गात्रम् देहं । अवेक्ष्य । हर्षान्विता सती । नखक्षताङ्गी नखैः क्षतानि अङ्गानि यस्याः सा । व्यालम्बिनीलललितालककुञ्चिताक्षी । व्यालम्बिनः दीर्घाः नीलाः कृष्णवर्णाः ललिताः मनोहराश्च अलकाः केशाः यस्याः । सा चासौ कुञ्चिताक्षी च । नखक्षतोपरि केशसंयोगेन कूर्पासकस्पर्शेन च वेदनानुभवादक्षिसंकोच इति भावः । अन्या । विरचिताधरचारुशोभा विरचिता अलक्तकालेपेन संपादिता अधरे चारुः शोभा यया सा । कूर्पासकं चोलकं । परिदधाति धारयति ॥ १६ ॥

अन्याश्चिरं सुरतकेलिपरिश्रमेण
खेदं गताः प्रशिथिलीकृतगात्रयष्टयः ।
संहृष्यमाणपुलकोरुपयोधरान्ता
अभ्यञ्जनं विदधति प्रमदाः सुशोभाः ॥ १७ ॥

अन्याश्चिरमिति । अन्याः । सुशोभाः । प्रमदाः । चिरम् चिरकालम् । सुरतकेलिपरिश्रमेण संभोगक्रीडायासेन खेदम् गताः ग्लानिं प्राप्ताः । प्रशिथिलीकृतगात्रयष्टयः । संहृष्यमाणाः प्रादुर्भूताः पुलकाः रोमाञ्चाः येषु तादृशौ ऊरू पयोधरान्तौ कुचप्रान्तौ च यासां ताः । संहृष्यमाणपुलकोरुपयोधरान्ताः । अभ्यञ्जनम् तैलाभ्यङ्गम् विदधति कुर्वन्ति ॥ १७ ॥

---

१ प्रविभक्तम् । २ रागशोभा । गण्डशोभा । ३ रक्तांशुकं । ४ नवं नताङ्गी । ५ व्यालम्बिताकुलिलता । व्यालम्बिनी विलुलिता । ६ स्वेदं । ७ संपीड्यमान । ८ विपुलोरु । ९ पयोधराताः । १० प्रत्यञ्जनम् । ११ सुशोभम् ।

बहुगुण[1]रमणीयो योषितां चित्तहारी
परिणतबहुशालिव्याकुलग्रामसीमा[2] ।
विनि[3]पतिततुषारः क्रौञ्च[4]नादोपगीतः
प्रदिशतु[5] हिमयुक्तस्त्वेष[6] कालः सुखं वः ॥ १८॥

बहुगुणेति । **बहुगुणरमणीयः** बहुगुणैः रमणीयः **योषिताम्** । **चित्तहारी** चित्ताकर्षकः । **परिणतबहुशालिव्याकुलग्रामसीमा** परिणतैः बहुभिः शालिभिः व्याकुलाः ग्रामसीमानः यस्मिन् सः । **सततं** । **अतिमनोज्ञः** । **विनिपतिततुषारः** विनिपतितः तुषारः हिमं यस्मिन् सः । **क्रौञ्चनादोपगीतः** । क्रौञ्चनादेन उपगीतः । **एषः हिमयुक्तः कालः** हेमन्त इत्यर्थः । **वः** युष्माकं । **सुखम्** । **प्रदिशतु** ददातु ॥ १८ ॥

---

१ इति बहुरमणीयो । २ सीमः । ३ सततमतिमनोज्ञः । सुरतगतिमनोज्ञः । विनिपतित-मनोज्ञः । ४ क्रौञ्चमालापरीतः । ५ उपदिशतु सुखं वः काल एषोऽतिरम्यः । ६ काल एषः । वेषकालः ।

इति बालबोधिनीटीकासहितस्य ऋतुसंहारकाव्यस्य
शरद्वर्णनं नाम चतुर्थः सर्गः ॥

पञ्चमः सर्गः ।

प्ररूढशालीक्षुचयावृतक्षितिं[1]
  क्वचित्स्थितक्रौञ्चनिनादराजितम्[2][3] ।
प्रकामकामं[4] प्रमदाजनप्रियं
  वरोरु[5] कालं शिशिराह्वयं शृणु ॥ १ ॥

प्ररूढेति । हे वरोरु । वरौ श्रेष्ठौ ऊरू यस्याः तत्संबोधनं । संज्ञापूर्वकविधेरनित्यत्वान्न ह्रस्वस्य गुण इति गुणः । प्ररूढशालीक्षुचयैः । प्रकर्षेण रूढानां वृद्धिंगतानां शालीनां कलमानां इक्षूणां च चयैः समूहैः आवृता आच्छादिता क्षितिः यस्मिन् तं । क्वचित्स्थितक्रौञ्चनिनादराजितम् । क्वचित् कुत्रचित्स्थले स्थितानां क्रौञ्चानां तन्नामकपक्षिणां निनादैः रवैः राजितं भूषितं । प्रकामकामं प्रकामं अत्यन्तं कामः मदनः यस्मिंस्तं । प्रमदाजनप्रियं प्रमदाजनस्य मानिनीजनस्य प्रियम् । शिशिराह्वयं शिशिर इति आह्वयः यस्य तं । शिशिरसंज्ञकमित्यर्थः । कालं कालवर्णनामिति भावः । शृणु ॥ १ ॥

निरुद्धवातायनमन्दिरोदरं
  हुताशनो भानुमतो गभस्तयः ।
गुरूणि वासांस्यबलाः सयौवनाः
  प्रयान्ति कालेऽत्र[6] जनस्य सेव्यताम् ॥ २ ॥

निरुद्धेति । अत्र काले अस्मिन् शिशिरे । निरुद्धवातायनमन्दिरोदरं निरुद्धानि वातायनानि गवाक्षा यस्य तादृशस्य मन्दिरस्य गृहस्य उदरं गर्भस्थानं ।

---

१ शाल्यंशुचयैर्मनोहरम् । शालिप्रचयावृताक्षितिम् । शालीक्षुचयैर्मनोहरम् । प्रवृद्धशालीक्षुचयावृतक्षितिम् । २ क्वचित्स्थितम् । निद्रोत्थित । क्षितिस्थित । ३ शोभितम् । ४ कामप्रमोदहेतुं । ५ प्रियेऽथ कालम् । ६ अद्य ।

हुताशनः अग्निः । भानुमतः सूर्यस्य गभस्तयः किरणाः । गुरूणि अलघूनि । वासांसि वस्त्राणि । सयौवनाः यौवनेन सहिताः । अबलाः स्त्रियः । जनस्य । सेव्यतां । प्रयान्ति ॥ २ ॥

न चन्दनं चन्द्रमरीचिशीतलं
न हर्म्यपृष्ठं शरदिन्दुनिर्मलम्[1] ।
न[2] वायवः सान्द्रतुषारशीतला
जनस्य चित्तं रमयन्ति सांप्रतम् ॥ ३ ॥

न चन्दनमिति । सांप्रतं । चन्द्रमरीचिशीतलं चन्द्रस्य मरीचिभिः किरणैः शीतलं । चन्दनं । 'जनस्य चित्तं' इति तंत्रेण सर्वात्रान्वेति । न रमयति । इति वचनविपर्ययेणान्वयः । शरदिन्दुनिर्मलम् । शरदिन्दुरिव निर्मलं । हर्म्यपृष्ठं हर्म्योपरिस्थानं च । जनस्य चित्तं न रमयति । सान्द्रतुषारशीतलाः । सान्द्रैर्निबिडैस्तुषारैः हिमकणैः शीतलाः । वायवः । जनस्य चित्तं न रमयन्ति ॥ ३ ॥

तुषारसंघातनिपातशीतलाः
शशाङ्कभाभिः[3] शिशिरीकृताः[4] पुनः ।
विपाण्डुतारागणचारुभूषणा[5]
जनस्य सेव्या न भवन्ति रात्रयः ॥ ४ ॥

तुषारेति । तुषारसंघातनिपातशीतलाः तुषाराणां संघातस्य समूहस्य निपातेन शीतलाः । शशाङ्कभाभिः चन्द्रकिरणैः । 'भाः प्रभावे मयूखेऽस्त्री' इति मेदिनी । पुनः शिशिरीकृताः । अभूततद्भावे च्विः । विपाण्डुतारागणचारुभूषणाः । विपाण्डुश्चासौ तारागणश्च स एव चारु भूषणं यासां ताः । रात्रयः । जनस्य । सेव्याः । न भवन्ति ॥ ४ ॥

गृहीतताम्बूलविलेपनस्रजः
पुष्पासवामोदितवक्त्रपङ्कजाः[6] ।
प्रकामकालागुरुधूपवासित[7]
विशान्ति शय्यागृहमुत्सुकाः[8] स्त्रियः ॥ ५ ॥

---

१ सुन्दरम् । २ न चाम्बरं सान्द्रतुषारशीतलम् । ३ रोचिः । शोभाः । ४ शिशिरीकृता । ५ जिह्मभूषिताः । चारुभूषिताः । ६ सुरासवा । सुखासवा । ७ वासिताम् । वासिना । ८ शय्याम् । ९ उत्सुकास्त्रियः ।

गृहीतेति । **गृहीतताम्बूलविलेपनस्रजः** । गृहीतानि ताम्बूलानि विलेपनानि कस्तूर्यादीनि स्रजः पुष्पमालाश्च याभिस्ताः । **पुष्पासवामोदितवक्त्रपङ्कजाः** । पुष्पासवेन माध्वीकेन आमोदितानि सुगन्धितानि वक्त्रपङ्कजानि मुखकमलानि यासां ताः । संवदत्ययं पाठः ४-२१ श्लोकेन । **स्त्रियः** । उत्सुकाः सत्यः । **प्रकामकालागुरुधूपवासितं** । प्रकाममत्यन्तं कालागुरुधूपेन वासितं सुगन्धीकृतं **शय्यागृहं** । **विशन्ति** ॥ ५ ॥

कृतापराधान्बहुशोऽभितर्जिता-
न्सवेपथून्साध्वसलुप्तचेतसः ।
निरीक्ष्य भर्तॄन्सुरताभिलाषिणः
स्त्रियोऽपराधान्समदा विसस्मरुः ॥ ६ ॥

कृतेति । **कृतापराधान्** कृताः अपराधाः यैस्तान् । **बहुशः** वारं वारं । बहुप्रकारेण वा । **अभितर्जितान्** भर्त्सितान् । 'बहुशोऽपि तर्जितान्' इति समीचीनः पाठः। बहुशःतर्जितानपि कृतापराधान् इत्यनेन भर्तुर्दोषाधिक्यं व्यज्यते। अत एव **सवेपथून्** सकम्पान् । **साध्वसलुप्तचेतसः** साध्वसेन भीत्या लुप्तं नष्टं चेतः चित्तं येषां तान् । **भर्तॄन्** पतीन् । **सुरताभिलाषिणः** सुरतं अभिलषन्ति तादृशान् । **निरीक्ष्य** विलोक्य । **समदाः** मदयुक्ताः । इदं अपराधविस्मरणे हेतुगर्भं विशेषणम् । **स्त्रियः** । **अपराधान्** । **विसस्मरुः** विस्मृतिं निन्युः ॥ ६ ॥

प्रकामकामैर्युवभिः सुनिर्दयं
निशासु दीर्घास्वभिरामिताश्चिरम् ।
भ्रमन्ति मन्दं श्रमखेदितोरवः
क्षपावसाने नवयौवनाः स्त्रियः ॥ ७ ॥

प्रकामेति । **प्रकामकामैः** अत्यन्तविषयेच्छावद्भिः । **युवभिः** तरुणैः । **दीर्घासु निशासु** । **सुनिर्दयं** सुतरां निर्गता दया यस्मिन्कर्मणि यथा तथा ।

---

१ अधितर्जितान् । अपि तर्जितान् । वितर्जितान् । बहुधाऽभितर्जितान् । २ मन्दा ३ शयने । ४ न सस्मरुः । ५ सुरतेऽतिनिर्दयम् । युवभिः सनिर्दयम् । सुरतैश्च । सुधत्वैः । ६ दीर्घास्वभिभाविता भृशम् । गाढं दयितैश्चिरं दृढम् । दीर्घास्वतिपीडिताः । ७ भवन्ति । धमन्ति । भ्रमन्त्यमन्थम् । ८ मन्द । ९ मोदितोरसः । खेदितोरसः ।

सरभसमिति यावत्। चिरं। अभिरामिताः संक्रीडिताः। मितां ह्रस्व इति सूत्रे वा चित्तविरागे इत्यतो वेत्यनुवृत्य व्यवस्थितविभाषाश्रयणान्नात्र मितां ह्रस्व इति ह्रस्वः। स्पष्टं चेदं सि०कौ० घटादिप्रकरणे। तेन 'रजो विश्रामयन् राज्ञां' रघु० ४-८५ 'धुर्यान्विश्रामयेति सः' रघु० १-५४ इति कालिदासप्रयोगोपपत्तिः। अत एव **श्रमपीडितोरवः** श्रमेण पीडितौ ऊरू यासां तादृश्यः। **नवयौवनाः**। **स्त्रियः**। **क्षपावसाने** निशान्ते। प्रातःकाले इति यावत्। **मन्दं**। **श्रमन्ति** ॥ ७ ॥

मनोज्ञकूर्पासकपीडितस्तनाः[1]
सरागकौशेयकभूषितोरवः[2]।
निवेशितान्तःकुसुमैः शिरोरुहै-
र्विभूषयन्तीव हिमागमं स्त्रियः ॥ ८ ॥

मनोज्ञेति। **मनोज्ञकूर्पासकपीडितस्तनाः**। मनोज्ञैः कूर्पासकैः कञ्चुकैः पीडिताः नियन्त्रिताः स्तना यासां ताः। **सरागकौशेयकभूषितोरवः**। सरागैः रागसहितैः कौशेयकैः कृमिकोशोत्थवस्त्रैः भूषिता ऊरवः यासां ताः। **निवेशितान्तःकुसुमैः**। अन्तर्निवेशितानि कुसुमानि येषु तैः। अन्तःशब्दस्य राजदन्तादित्वात्परनिपातः। **शिरोरुहैः** कुन्तलैः। उपलक्षिताः। इत्थंभूतलक्षणे इति तृतीया। **स्त्रियः**। **हिमागमं**। शिशिरं। **विभूषयन्तीव** अलंकुर्वन्तीव। उत्प्रेक्षालंकारः ॥ ८ ॥

पयोधरैः कुङ्कुमरागपिञ्जरैः
सुखोपसेव्यैर्नवयौवनोष्मभिः[3]।
विलासिनीभिः[4] परिपीडितोरसः[5]
स्वपन्ति[6] शीतं परिभूय कामिनः ॥ ९ ॥

पयोधरैरिति। **विलासिनीभिः**। इदं कर्तृपदं। **कुङ्कुमरागपिञ्जरैः**। कुङ्कुमस्य काश्मीरजस्य रागेण रङ्गेण पिञ्जरैः पीतरक्तैः। **नवयौवनोष्मभिः**।

---

१ कूर्पासनिपीडित। २ कौशेयविभूषितोरसः। कौशेयविभूषितोरवः। ३ यौवनोत्सवाः। यौवनोत्सवः। यौवनोन्नतैः। यौवनोद्भवैः। ४ विलासिनीनाम्। ५ भृशम्। ६ क्षपन्ति। क्षिपन्ति।

नवयौवनस्योष्मा येषु तैः। अतएव सुखोपसेव्यैः सुखोपभोग्यैः। पयोधरैः स्तनैः । इदं करणपदं । परिपीडितोरसः । परिपीडितान्याश्लिष्टान्युरांसि वक्षःस्थलानि येषां ते। कामिनः कामुकाः । शीतं हिमं । परिभूय अनादृत्य । स्वपन्ति शयनं कुर्वन्ति ॥ ९ ॥

सुगन्धिनिःश्वासविकम्पितोत्पलं[1]
मनोहरं कामरतिप्रबोधकम्[2] ।
निशासु हृष्टाः[3] सह कामिभिः स्त्रियः
पिबन्ति मद्यं मदनीयमुत्तमम् ॥ १० ॥

सुगन्धीति । निशासु । रात्रिषु । हृष्टाः प्रमुदिताः । स्त्रियः । कामिभिः स्वकान्तैः। सह । सुगन्धिनिःश्वासविकम्पितोत्पलम्। सु ष्ठुगन्धो येषां तादृशैः निःश्वासैः विशेषेण कम्पितानि उत्पलानि सौगन्ध्यार्थं स्थापितानि कमलानि यस्मिंस्तत्। मनोहरं। कामरतिप्रबोधकं मदनोद्दीपकमित्यर्थः। उत्तमं। मदनीयं मदजनकं । मद्यं पिबन्ति ॥ इदं पद्यं प्रथमसर्गस्थतृतीयश्लोकेनांशतः समानार्थकम् ॥ १० ॥

अपगतमदरागा योषिदेका[4] प्रभाते
कृतनिबिडकुचाग्रा[5] पत्युरालिङ्गनेन ।
प्रियतमपरिभुक्तं वीक्षमाणा[6] स्वदेहं
व्रजति शयनवासाद्वासमन्यं[7][8] हसन्ती ॥ ११ ॥

अपगतमदेति । अपगतमदरागा अपगतः नष्टः मदरागः मदरक्तिमा यस्याः सा । पत्युः आलिङ्गनेन । कृतनिबिडकुचाग्रा। कृते निबिडे निम्ने कुचाग्रे यस्याः सा । सविशेषणानां वृत्तिर्न । वृत्तस्य विशेषणयोगो नेति समयविरुद्धोऽयं प्रयोगः । प्रियतमपरिभुक्तं । स्वदेहं । वीक्षमाणा । हसन्ती । एका। योषित् ।प्रभाते । शयनवासात् शय्यागृहात् । अन्यं । वासं गृहं । गुर्वधिष्ठित-

१ दरम् । विकलितोत्पलम् । २ प्रबोधनम् । ३ कृष्णासु च कामिनो जनाः । ४ एव । एषाम् । ५ कृतविनतकुचाग्रा । कृताविकृतकुचाग्रा । ६ वीक्ष्यमाणा । ७ गेहात् । ८ अन्यद्धसन्ती । अन्यद्व्रजन्ती ।

मित्यर्थः । **व्रजति** गच्छति । अस्य चतुर्थचरणः द्वितीयसर्गस्थ २१ श्लोकस्य चतुर्थचरणेन अवशिष्टभागश्च चतुर्थसर्गस्थ १६ श्लोकेनार्थसाम्यं वहति ॥ ११ ॥

अगुरुसुरभिधूपामोदितं[1] केशपाशं[2]
गलितकुसुममालं[3] कुञ्चिताग्रं[4] वहन्ती ।
त्यजति गुरुनितम्बा निम्ननाभिः सुमध्या[5]
उषसि[6] शयनमन्या[7] कामिनी चारुशोभा[8] ॥ १२ ॥

अगुरुसुरभीति । **अगुरुसुरभिधूपामोदितं** । अगुरोः सुरभिधूपेन आमोदितं सुगन्धितं स. ४।५ श्लोकोऽस्यानुकूलः । **गलितकुसुममालं** । गलिता कुसुममाला यस्मात्तं । **कुञ्चिताग्रं** । कुञ्चितानि कुटिलान्यग्राणि प्रान्तभागा यस्य तं । **केशपाशं** केशसमूहं ‘ पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ’ इत्यमरः । **गुरुनितम्बा** । गुरुः नितम्बः कटिपश्चाद्भागो यस्याः सा । **निम्ननाभिः** निम्ना गभीरा नाभिर्यस्याः सा । **सुमध्या** शोभनः मध्यः कटिभागो यस्याः सा । **चारुशोभा अन्या कामिनी उषसि** प्रभाते **शयनं त्यजति** ॥ १२ ॥

कनककमलकान्तैश्चारुताम्राधरोष्ठैः[9]
श्रवणतटनिषक्तैः[10] पाटलोपान्तनेत्रैः ।
उषसि वदनबिम्बैरंससंसक्त[11]केशैः
श्रिय इव गृहमध्ये संस्थिता[12] योषितोऽद्य[13] ॥ १३ ॥

कनकेति । **अद्य** अस्मिञ्शिशिरे **उषसि कनककमलकान्तैः** कनककमलमिव सुवर्णकमलमिव कान्तैः मनोरमैः । चारवः सुन्दरास्ताम्राश्च अधरोष्ठा येषां तैः । अस्य ‘ **वदनबिम्बैः** ’ इति दूरेणान्वयः । **श्रवणतटनिषक्तैः** । श्रवणतटे कर्णप्रान्ते निषक्तैः संसक्तैः । आकर्ण दीर्घैरित्यर्थः । **पाटलोपान्तनेत्रैः** पाटलाः श्वेतरक्ता उपान्ता येषां तानि च

---

१ आमोदितान् । शोभितम् । कुसुमवासामोदितम् । २ केशपाशान् । ३ मालान् । ४ तन्वती कुञ्चिताग्रम् । ५ निम्नमध्यावसाना—वसन्ना । ६ प्युषसि । ७ शयनवासः । शयनवासम् । शयनमध्या । ८ कामशोभा । कामशोभाम् । कामशोभम् । ९ सद्य एवाम्बुधौतैः । चारुसबिम्बाधरोष्ठैः । १० स्मरदमृतनिषक्तैः । श्रवणतटनिषिक्तैः—ानियुक्तैः । ११ संयुक्त । १२ संस्मिता । १३ योषिताय ।

तानि नेत्राणि च तैः अंससंसक्तकेशैः अंसेषु संसक्ताः संलग्नाः ते च ते केशाश्च तैः । योषितः स्त्रियः । गृहमध्ये । श्रिय इव लक्ष्म्य इव । संस्थिताः ॥ २३ ॥

पृथुजघनभरार्ताः किंचिदानम्रमध्याः[1]
स्तनभर[2]परिखेदान्मन्दमन्दं व्रजन्त्यः[3] ।
सुरत[4]समयवेषं नैशमाशु[5] प्रहाय[6]
दधति दिवसयोग्यं वेषमन्यास्[7]तरुण्यः ॥ १४ ॥

पृथुजघनेति । पृथुजघनभरार्ताः पृथुनः महतः जघनभरेण आर्ताः पीडिताः । किञ्चिदानम्रमध्याः किञ्चिदीषदानम्रः मध्यो यासां ताः । स्तनभरपरिखेदात् स्तनभरस्य परिखेदात् । मन्दमन्दं अतिमन्दमित्यर्थः । प्रकारे गुणवचनश्चेति द्विर्भावः । समासवद्भावात्सुब्लुक् । व्रजन्त्यः गच्छन्त्यः । तरुण्यः । नैशं निशासंबन्धिनं सुरतसमयवेषं सुरतसमयस्य वेषं नेपथ्यं । आशु शीघ्रं । प्रहाय विहाय । दिवसयोग्यं वेषं दधति ॥ १४ ॥

नखपद[8]चितभागान्वीक्षमाणाः स्तनान्ता-[9]
नधरकिसलयाग्रं[10] दन्तभिन्नं[11] स्पृशन्त्यः ।
अभिमतर[12]तवेषं नन्दयन्त्य[13]स्तरुण्यः
सवितुरुदयकाले भूषयन्त्याननानि ॥ १५ ॥

नखपदेति । नखपदचितभागान् । नखपदैः नखाङ्कैश्चिता व्याप्ता भागा अंशा येषां तान् । स्तनान्तान् । वीक्षमाणाः अवलोकयन्त्यः । दन्तभिन्नं दशनखण्डितं । अधरकिसलयाग्रं अधरः किसलयमिव तस्य अग्रं । स्पृशन्त्यः परामृशन्त्यः । अभिमतरसवेषं अभिमतस्याभिलषितस्य रतस्य वेषं नेपथ्यं ' आकल्पवेषौ नेपथ्यं ' इत्यमरः । नन्दयन्त्यः । तरुण्यः । सवितुः । उदयकाले । आननानि वदनानि । भूषयन्ति ॥ १५ ॥

---

१ मध्या । २ स्तनयुग । ३ व्रजन्त्यः । ४ सुरतसमयखेदम् । सुरतशयनवेषम् । अङ्गे । अन्यत् । अन्त्यं । ६ विहाय । ७ एषाः । एताः । एकाः । ८ नखपदरचिताग्रान् । नखपदहृद-भङ्गान् । ९ स्तनाग्रान् । १० ०याग्रान् । ११ भिन्नान् । १२ रसमेता । रसमेतम् । तमोदम् । अतिशयधृतदेहान् । १३ दीपयन्त्यः । वर्णयन्त्यः । अन्धयन्त्यः ।

प्रचुरगुडविकारः[1] स्वादुशालीक्षुरम्यः
प्रबल[2]सुरतकेलिर्जात[3]कन्दर्पदर्पः ।
प्रियजन[4]रहितानां चित्तसंतापहेतुः
शिशिरसमय एष श्रेयसे वोऽस्तु[5] नित्यम् ॥१६॥

प्रचुरेति । प्रचुरगुडविकारः प्रचुरः प्रभूतः गुडविकारः शर्करादिवस्तुजातं यस्मिन् सः । स्वादुशालीक्षुरम्यः स्वादवः मधुरा ये शालयः कलमाः इक्षवो रसालाः । 'रसाल इक्षुः' इत्यमरः । तै रम्यः । प्रबलसुरतकेलिः प्रबला सुरतकेलिर्यस्मिन् सः । जातकन्दर्पदर्पः । जातः कन्दर्पदर्पः मदनाभिमानः यस्मिन् सः । प्रियजनरहितानां । विरहिणामित्यर्थः चित्तसंतापहेतुः । चित्तसंतापस्य हेतुः कारणं । एषः शिशिरसमयः । नित्यं निरन्तरं वः श्रेयसे कल्याणाय । अस्तु ॥ १६ ॥

---

१ विपाकः । गुरुविपाकः । २ प्रसृत । प्रधृत । ३ शान्त । ४ तम । ५ तेऽस्तु ।

इति बालबोधिनीटीकासहितस्य ऋतुसंहारकाव्यस्य
शिशिरवर्णनं नाम पञ्चमः सर्गः ॥

षष्ठः सर्गः ।

मधुरेण समापयेदिति न्यायेनान्ते वसन्तं वर्णयति—

प्रफुल्लचूताङ्कुरतीक्ष्णसायको
द्विरेफमाला[1]विलसद्धनुर्गुणः ।
मनांसि भेत्तुं[2] सुरत[3]प्रसङ्गिनां
वसन्तयोद्धा[4] समुपागतः प्रिये ॥ १ ॥

प्रफुल्लेति । हे प्रिये प्रफुल्लचूताङ्कुरतीक्ष्णसायकः प्रफुल्लः विकसितः चूताङ्कुर एव आम्रमञ्जर्येव तीक्ष्णसायको यस्य सः । द्विरेफमालाविलसद्धनुर्गुणः । द्विरेफमालैव भ्रमरपङ्क्तिरेव विलसन् शोभमानः धनुर्गुणः धनुर्ज्या यस्य सः । द्विरेफशब्दस्य भ्रमरशब्दवाचकत्वेऽपि लक्षणया भ्रमररूपार्थबोधकत्वम् । वसन्तयोद्धा वसन्त एव योद्धा । सुरतप्रसङ्गिनां सुरते तत्पराणां । कामुकानामित्यर्थः । मनांसि । भेत्तुं विदारयितुम् । वेद्धुमित्यपपाठः । व्यध्धातोस्तुमुन्प्रत्यये संप्रसारणासंभवात् । समुपागतः संप्राप्तः ॥ १ ॥

द्रुमाः सपुष्पाः सलिलं सपद्मं[5]
स्त्रियः सकामाः पवनः[6] सुगन्धिः[7] ।
सुखाः प्रदोषा दिवसाश्च रम्याः
सर्वं प्रिये चारुतरं वसन्ते ॥ २ ॥

द्रुमा इति । द्रुमाः सपुष्पाः पुष्पैः सहिताः । सलिलं । सपद्मं पद्मैः सहितं । स्त्रियः । सकामाः समदनाः । पवनः वायुः सुगन्धिः शोभनः गन्धः यस्य सः

---

१ मालां विदधन् धनुर्गुणम् । २ वेद्धुं । ३ सुरतोत्सुकानां । ४ योधः । ५ सुपद्मं । ६ पवनाः । ७ सुगन्धयः ।

गन्धस्येतीत्वम् । प्रदोषाः रजनीमुखानि । सुखाः सुखकराः । दिवसाश्च रम्याः । अतः इत्यध्याहार्यम् । हे प्रिये वसन्ते सर्वं चारुतरम् । रमणीयतरं भवतीति शेषः । उपजातिवृत्तम् ॥ २ ॥

वापीजलानां मणिमेखलानां
शशाङ्कभासां प्रमदाजनानाम् ।
चूतद्रुमाणां कुसुमानितानां[1]
ददाति[2] सौभाग्य[3]मयं वसन्तः ॥ ३ ॥

वापीजलानामिति । अयं वर्ण्यमानः वसन्तः वापीजलानां दीर्घिकोदकानाम् । मणिमेखलानां हीरकादिमणिखचितरसनानां । शशाङ्कभासां चन्द्रकान्तीनां । प्रमदाजनानां कामिनीजनानां । कुसुमानितानां पुष्पनम्राणां । चूतद्रुमाणां आम्रवृक्षाणां । सौभाग्यं सौन्दर्यातिशयं । ददाति ॥ ३ ॥

कुसुम्भरागारुणितैर्दुकूलै-
र्नितम्बबिम्बानि विलासिनीनाम्[4] ।
तन्वंशुकैः[5] कुङ्कुमरागगौरै[6]-
रलंक्रियन्ते स्तनमण्डलानि ॥ ४ ॥

कुसुम्भेति । कुसुम्भरागारुणितैः कुसुम्भस्य रागेण अरुणितैः रक्तीकृतैः । दुकूलैः पट्टवस्त्रैः । वसन्तोत्सवे तथाविधनेपथ्यस्यावश्यकत्वात् । उक्तं च रत्नावल्याम् 'कौसुम्भरागरुचिरस्फुरदंशुकान्ता ' इति । विलासिनीनां । नितम्बबिम्बानि । तथा कुङ्कुमरागगौरैः कुङ्कुमरागेण काश्मीरजरङ्गेण गौरैः पीतैः । ' गौरः पीतेऽरुणे श्वेते' इति मेदिनी । तन्वंशुकैः सूक्ष्मवस्त्रैः । स्तनमण्डलानि । अलंक्रियन्ते ॥४॥

कर्णेषु योग्यं नवकर्णिकारं
चलेषु[7] नीलेष्वलकेष्वशोकम्[8] ।
पुष्पं[9] च फुल्लं नव[10]मल्लिकायाः
प्रयान्ति[11] कान्तिं प्रमदाजनानाम्[12] ॥ ५ ॥

---

१ कुसुमान्वितानां । २ तनोति । ३ सौरभ्यम् । ४ नितम्बिनीनाम् । ५ रक्तांशुकैः । ६ पिञ्जरैः । ७ स्तनेषु हाराः । केशेषु । ८ अशोकैः । ९ शिखासु फुल्लाः । शिखासु मालाः । सुखासु पुष्पम् । १० नवमालिकाश्च । नवमालिकाश्च । ११ प्रयान्ति शोभां- सङ्गम् । १२ प्रमदाजनस्य । वनिताजनस्य ।

कर्णेष्विति । प्रमदाजनानां कर्णेषु श्रोत्रेषु । योग्यं अनुरूपं । नवकर्णिकारं नूतनकर्णिकारपुष्पं। चलेषु चञ्चलेषु । नीलेषु श्यामेषु । अलकेषु केशेषु । अशोकं अशोकपुष्पं । नवमल्लिकायाः फुल्लं पुष्पं च । सर्वत्र जात्यभिप्रायेणैकवचनम् । कान्तिं शोभां । प्रयान्ति । प्रमदाङ्गस्थितानि तान्यतीव शोभन्त इति भावः ॥५॥

स्तनेषु[1] हाराः सितचन्दनार्द्रा
भुजेषु सङ्गं[2] वलयाङ्गदानि ।
प्रयान्त्यनङ्गातुरमानसानां[3]
नितम्बिनीनां[4] जघनेषु काञ्च्यः ॥ ६ ॥

स्तनेष्विति । अनङ्गातुरमानसानां अनङ्गेन मदनेनातुराणि व्याकुलानि मानसानि यासां तासां । नितम्बिनीनां । स्तनेषु । सितचन्दनार्द्राः सितचन्दनेन आर्द्राः क्लिन्नाः । हाराः मौक्तिकहाराः । भुजेषु । वलयाङ्गदानि कङ्कणकेयूरकाणि । जघनेषु कटिपुरोभागेषु । काञ्च्यः रसनाः। सङ्गं संश्लेषम् । प्रयान्ति प्राप्नुवन्ति॥६॥

सपत्रलेखेषु विलासिनीनां
वक्त्रेषु[5] हेमाम्बुरुहोपमेषु ।
रत्नान्तरे[6] मौक्तिकसङ्गरम्यः[7]
स्वेदागमो[8] विस्तरतामुपैति ॥ ७ ॥

सपत्रेति । विलासिनीनां । सपत्रलेखेषु पत्रलेखासहितेषु । हेमाम्बुरुहोपमेषु सुवर्णपङ्कजसदृशेषु । वक्त्रेषु वदनेषु । रत्नान्तरे रत्नानां भिन्नजातीयरत्नानामन्तरे अवकाशे। मौक्तिकसङ्गरम्यः मौक्तिकसंसर्ग इव रम्यः रमणीयः। स्वेदागमः घर्मप्रादुर्भावः । विस्तरताम् । उपैति प्राप्नोति । भिन्नजातीयरत्नावल्यां मौक्तिकसंसर्गेण यथा रमणीयता दृश्यते तथा पत्रलेखास्थितनानावर्णेषु स्वेदोद्गमेनेति भावः ॥ ७ ॥

उच्छ्वासयन्त्यः[9] श्लथबन्धनानि
गात्राणि कंदर्पसमाकुलानि ।

---

१ कुचेषु । २ कम्बूवलयादाङ्गानि। चञ्चद्वलयाङ्गदानि । मुखेषु ताम्बूल-कर्पूर-सुगन्धिवाताः। ३ निःशङ्क-निःसङ्ग-मनङ्गसौख्यम् । ४ विलासिनीनाम् । ५ मुखेषु । ६ स्तनान्तरे । रत्यन्तरे । रतान्तरे । ७ सङ्गजातः । सङ्गतुल्यः । तुल्यरूपः । ८ स्वेदोद्गमः । ९ उल्लासयन्त्यः ।

समीपवर्तिष्वधुना[1] प्रियेषु
समुत्सुका एव भवन्ति नार्यः ॥ ८ ॥

उच्छ्वासयन्त्य इति । **कन्दर्पसमाकुलानि** कन्दर्पेण मदनेन समाकुलानि व्याकुलानि । अत एव **श्लथबन्धनानि** श्लथानि गलितानि बन्धनानि सन्धिबन्धा येषां तानि । **गात्राणि** अङ्गानि **उच्छ्वासयन्त्यः** सोत्साहं कुर्वन्त्यः । **नार्यः** । अधुना अस्मिन्वसन्तकाले इत्यर्थः । **प्रियेषु** स्वकान्तेषु । **समीपवर्तिषु** संनिहितेषु । **समुत्सुका एव भवन्ति** समुत्कण्ठिता एव भवन्ति । वसन्तस्य अतीव कामोद्दीपकत्वादिति भावः ॥ ८ ॥

तनूनि[2] पाण्डूनि मदालसानि[3]
मुहुर्मुहुर्जृम्भणतत्पराणि ।
अङ्गान्यनङ्गः[4] प्रमदाजनस्य
करोति लावण्यससंभ्रमाणि[5] ॥ ९ ॥

तनूनीति । **अनङ्गः** कामः । **प्रमदाजनस्य** वनिताजनस्य । **लावण्यससंभ्रमाणि** लावण्येन ससंभ्रमाणि सत्वराणि । चञ्चलानीति यावत् । **अङ्गानि** गात्राणि । **तनूनि** कृशानि । **पाण्डूनि** पाण्डुराणि । **मदालसानि** मदेन अलसानि जडानि । **मुहुर्मुहुः** वारं वारं । **जृम्भणतत्पराणि** जृम्भिकासक्तानि **करोति** ॥९॥

नेत्रेषु लोलो[6] मदिरालसेषु[7]
गण्डेषु पाण्डुः कठिनः[8] स्तनेषु ।
मध्येषु निम्नो[9] जघनेषु पीनः
स्त्रीणामनङ्गो बहुधा[10] स्थितोऽद्य ॥ १० ॥

नेत्रेष्विति । **अद्य** अस्मिन्वसन्ते । **अनङ्गः** कामः । **स्त्रीणां** । इदं प्रत्येकं सप्तम्यन्तविशेष्येषु संबध्यते । **मदिरालसेषु** मदिरया अलसेषु मन्देषु । **नेत्रेषु** । **लोलः** चञ्चलः । **गण्डेषु पाण्डुः** । **स्तनेषु** कठिनः । **मध्येषु** कटिभागेषु । **निम्नः**

---

१ अपि कार्मुकेषु-कामुकेषु । २ घनानि । ३ सुकम्पितानि । समन्थराणि । ४ अमान्य । ५ रसात्सुकानि । रसोत्तराणि । असौ प्रोषितभर्तृकस्य । ६ लोलं । अलोलः । ७ मदिरारसेषु । ८ कठिनस्तनेषु । ९ नम्रः । १० बहुशः ।

कृश इति यावत्। जघनेषु पीनः स्थूलः । एवमिति शेषः । **बहुधा** अनेकप्रकारेण **स्थितः** । अत्र लोलत्वादिहेतोर्मदनस्य लोलत्वाद्यभेदवर्णनाद्धेत्वलंकारः । ‘ हेतुहेतुमतोरैक्यं हेतुं केचित्प्रक्षते ’ इति तल्लक्षणात् ॥ १० ॥

अङ्गानि निद्रालसविभ्रमाणि
वाक्यानि किंचिन्मदिरालसानि ।
भ्रूक्षेपजिह्मानि च वीक्षितानि
चकार कामः प्रमदाजनानाम् ॥ ११ ॥

अङ्गानीति । **कामः** । **प्रमदाजनानां** । **अङ्गानि** गात्राणि । **निद्रालसविभ्रमाणि** निद्रा अलसः विभ्रमाः विलासाश्च येषु तादृशानि । **वाक्यानि** । **किंचिन्मदिरालसानि** । किंचिन्मदलालसानीति पाठे किंचिन्मदः लालसा उत्सुकता च येषु तादृशानि । ‘ लालसौत्सुक्यतृष्णातिरेकयाच्ञासु’ इति मेदिनी । **वीक्षितानि** विलोकितानि **च भ्रूक्षेपजिह्मानि** भ्रूक्षेपेण भ्रूविलासेन जिह्मानि वक्राणि **चकार** ॥ ११ ॥

प्रियङ्गुकालीयककुङ्कुमाक्तं
स्तनेषु गौरेषु विलासिनीभिः ।
आलिप्यते चन्दनमङ्गनाभि-
र्मदालसाभिर्मृगनाभियुक्तम् ॥ १२ ॥

प्रियङ्ग्विति । **मदालसाभिः** मदेन अलसाभिः । **विलासिनीभिः** विभ्रमवतीभिः । **अङ्गनाभिः** । **गौरेषु स्तनेषु** । **प्रियङ्गुकालीयककुङ्कुमाक्तं** प्रियङ्गुः सुगन्धिबीजविशेषः कालीयकं कृष्णागुरु कुङ्कुमं काश्मीरजं तैः आक्तं मिश्रितं **मृगनाभियुक्तं** मृगनाभ्या कस्तूर्या युक्तं सहितं **चन्दनं आलिप्यते** ॥ १२ ॥

---

१ विह्वलानि । लसितानि नित्यम् । २ मदसालसानि । मदलालसानि । ३ विलोचनानि । ४ करोति । ५ प्रमदोत्तमानाम् । प्रमदाजनस्य । ६ कुङ्कुमानि । ७ स्तनाङ्गरागेषु विसर्जितानि । विचर्चितानि । ८ आलिख्यते । आसेव्यते ।

गुरूणि वासांसि विहाय तूर्णं
तनूनि लाक्षारसरञ्जितानि ।
सुगन्धिकालागुरुधूपितानि
धत्ते जनः काममदालसाङ्गः ॥ १३ ॥

गुरूणीति । **काममदालसाङ्गः** कामस्य मदेन अलसान्यङ्गानि यस्य सः । **जनः** । **तूर्णं** सत्वरं । **गुरूणि** । **वासांसि** । **विहाय** त्यक्त्वा । **लाक्षारसरञ्जितानि** लाक्षारसेन आलक्तकरसेन रञ्जितानि । **सुगन्धिकालागुरुधूपितानि** सुगन्धिना शोभनगन्धवता कालागुरुणा धूपितानि वासितानि । **तनूनि** सूक्ष्माणि । **धत्ते** । इदं वर्णनं प्रथमसर्गस्थ सप्तमश्लोकस्थवर्णनानुगुणम् ॥ १३ ॥

पुंस्कोकिलश्चूतरसासवेन
मत्तः प्रियां चुम्बति रागहृष्टः ।
कूजद्विरेफोऽप्ययमम्बुजस्थः
प्रियं प्रियायाः प्रकरोति चाटु ॥ १४ ॥

पुंस्कोकिल इति । **चूतरसासवेन** चूतरसः आम्ररस एवासवः मद्यं तेन । **मत्तः** क्षीबः । **पुंस्कोकिलः** पुमांश्चासौ कोकिलश्च । परभृत इत्यर्थः । **रागहृष्टः** प्रेममुदितः सन् । **प्रियां** प्रेयसीं । **चुम्बति** । **अम्बुजस्थः** कमलस्थितः । **अयं** । **कूजद्विरेफोऽपि** गुञ्जन्भ्रमरोऽपि । **प्रियायाः** कान्तायाः । **प्रियं** । **चाटु** मिथ्याश्लाघां **प्रकरोति** । एतदनुरूपं वर्णनम् अत्रैव स० २ श्लोक० ६ ॥ १४ ॥

ताम्रप्रवालस्तबकावनम्रा-
श्चूतद्रुमाः पुष्पितचारुशाखाः ।
कुर्वन्ति कामं पवनावधूताः
पर्युत्सुकं मानसमङ्गनानाम् ॥ १५ ॥

ताम्रप्रवालेति । **ताम्रप्रवालस्तबकावनम्राः** ताम्रैरारक्तैः प्रवालस्तबकैः पल्लवगुच्छैः अवनम्राः । **पुष्पितचारुशाखाः** पुष्पिताः संजातपुष्पाश्चारुशाखा

---

१ सांप्रतम् । २ शिरांसि । नितान्त । ३ कामशरानुविद्धः । ०लसाङ्गे । ४ चूतरसेन मत्तः प्रियासुखं चुम्बति सादरोऽयम् । ५ गुञ्जन् । ६ अधिकः प्रमत्तः । ७ क्षिप्रम् । प्रियः । चाटुम् । क्षिप्रम् । ९ प्रवालस्तबकावतंसाः । प्रवालताम्र० । १० कान्ते । सान्द्राः । ११ पवनाभिभूताः । १२ समुत्सुकम् । पर्युत्सुकत्वं-समुत्सुकत्वं--मनसः ।

येषां ते । पवनावधूताः मारुतचालिताः । चूतद्रुमाः । आम्रवृक्षाः । अङ्गनानां कामिनीनां । मानसं । कामं पर्याप्तं । पर्युत्सुकं । कुर्वन्ति ॥ १५ ॥

आ मूलतो विद्रुमरागताम्रं[1]
सपल्लवाः[2] पुष्पचयं दधानाः ।
कुर्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम् ॥ १६ ॥

आ मूलत इति । आ मूलतः । मूलादारभ्य । विद्रुमरागताम्रं विद्रुमरागवत्प्रवालरागवत्ताम्रमारक्तं । पुष्पचयं पुष्पनिकरं । दधानाः धारयन्तः । अशोकस्य मूलत एव कुसुमोद्गमो भवतीति प्रसिद्धिः । कुमारसंभवे । असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि इति स० ३–२६ । सपल्लवाः पल्लवसहिताः । अशोकाः । नवयौवनानां नवयुवतीनां । हृदयं । सशोकं कुर्वन्ति । प्र० रा० अ० ६ ‘ अये कथमशोकोऽपि ममायं शोकतां गतः ’ इति ॥ १६ ॥

मत्तद्विरेफपरिचुम्बितचारुपुष्पा
मन्दानिलाकुलितनम्रमृदुप्रवालाः[3] ।
कुर्वन्ति कामिमनसां[4] सहसोत्सुकत्वं
चूताभिरामकलिकाः[5] समवेक्ष्यमाणाः ॥ १७ ॥

मत्तेति । मत्तद्विरेफपरिचुम्बितचारुपुष्पाः मत्तद्विरेफैः मत्तभ्रमरैः परिचुम्बितानि आलीढानि चारुपुष्पाणि यासां ताः । मन्दानिलाकुलितनम्रमृदुप्रवालाः मन्दानिलेन आकुलितानि व्यस्तानि नम्राणि मृदुप्रवालानि कोमलपल्लवानि यासां ताः । समवेक्ष्यमाणाः विलोक्यमानाः । चूताभिरामकलिकाः चूतस्याम्रवृक्षस्य अभिरामाः सुन्दराः कलिकाः मञ्जर्यः । कामिमनसां । सहसा उत्सुकत्वं औत्सुक्यं कुर्वन्ति ॥ १७ ॥

---

१ ताम्राः । २ सपल्लवम् । ३ चारु । चारुतर । ४ मनसश्च समुत्सुकत्वम् । ५ चूता विमुक्तकलिकाः । बालातिमुक्तलतिकाः ।

कान्तामुखद्युतिजुषामचिरोद्गतानां
शोभां परां कुरबकद्रुममञ्जरीणाम् ।
दृष्ट्वा प्रिये सहृदयस्य भवेन्न कस्य
कंदर्पबाणपतनव्यथितं हि चेतः ॥ १८ ॥

कान्तामुखेति । कान्तामुखद्युतिजुषां कान्तामुखानां कामिनीवदनानां द्युतिं कान्तिं जुषन्ते तेषां । अचिरोद्गातानां सद्यः प्रादुर्भूतानां कुरबकद्रुममञ्जरीणां लोके 'कोरांटी' इतिप्रसिद्धवृक्षकलिकानां । परां श्रेष्ठां । शोभां । दृष्ट्वा । कस्य । सहृदयस्य समनस्कस्य । चेतः चित्तं । कंदर्पबाणपतनव्यथितं कंदर्पस्य बाणपतनेन शरपातेन व्यथितं दुःखितं । न भवेत् सर्वस्यापि भवेदित्यर्थः । हिः पादपूरणे ॥ १८ ॥

आदीप्तवह्निसदृशैर्मरुताऽवधूतैः
सर्वत्र किंशुकवनैः कुसुमावनम्रैः ।
सद्यो वसन्तसमयेन समाचितेयं
रक्तांशुका नववधूरिव भाति भूमिः ॥ १९ ॥

आदीप्तेति । वसन्तसमयेन । सर्वत्र सर्वस्मिन्स्थले । आदीप्तवह्निसदृशैः आदीप्तेन प्रदीप्तेन वह्निना सदृशैस्तुल्यैः । मरुता वायुना । अवधूतैः कम्पितैः कुसुमावनम्रैः कुसुमैः अवनम्राणि अवनतानि तैः । किंशुकवनैः पलाशकाननैः । समाचिता व्याप्ता । इयं पुरोदृश्यमाना । भूमिः सद्यः सपदि । रक्तांशुका रक्तं आरक्तमंशुकं वस्त्रं यस्याः सा । नववधूरिव नवोढेव । भाति शोभते ॥ १९ ॥

किं किंशुकैः शुकमुखच्छविभिर्न भिन्नं
किं कर्णिकारकुसुमैर्न कृतं नु दग्धम् ।
यत्कोकिलैः पुनरयं मधुरैर्वचोभि-
र्यूनां मनः सुवदनानिहितं निहन्ति ॥ २० ॥

---

१ कान्तामुखं द्युतिमनोहरमुद्धतानाम् । कान्ताननद्युतिमुषामपि चोद्गतानां । नानामुखद्युतिजुषामपि चोद्गतानाम् । कान्तामुखद्युतिनिभाम् । २ हि पथिकस्य । प्रियतमारहितस्य पुंसः । ३ पतन-पवन-व्यथितम् । ४ रविपारिजातैः । पवनावधूतैः । ५ कीर्णैः । ६ हि समागतेयम् । समुपागते हि-च । वसन्तऋतुनाधिगता नितान्तम् । ७ रक्तांशुकैः । ८ च दग्धम् । न दग्धम् । ९ कृतं मनोज्ञम् । कृतं च दग्धम् । हतं मनोज्ञैः । १० कोकिलाः । ११ पुंस्वैः । पुनरमी । १२ सुवदने नियतं हरन्ति-दहन्ति ।

किमिति । सुवदनानिहितं शोभनानि वदनानि यासां तासु निहितं स्थापितं । यूनां तरुणानां । मनः । शुकमुखच्छविभिः शुकमुखस्य छविरिव छविर्येषां तैः । किंशुकैः पलाशपुष्पैः न भिन्नं किं। अपि तु भिन्नमेवेत्यर्थः । तथा कर्णिकार-कुसुमैः कर्णिकारस्य परिव्याधस्य लोके ‘ पांगारा ’ इति प्रसिद्धस्य वृक्षस्य कुसुमैः पुष्पैः दग्धं न कृतं नु । अपि तु दग्धमेव । अयं नुः प्रश्नार्थकः । ‘ नुः पृच्छायां ’ इत्यमरः । यत् यस्मात्कारणात् कोकिलः। पुनः वारं वारं । मधुरैः । वचोभिः । निहन्ति हिनस्ति । प्रागेव हतस्य हननमयुक्तमिति भावः ॥ २० ॥

पुंस्कोकिलैः [1]कलवचोभिरुपात्तहर्षैः
कूजद्भिरुन्मदकलानि [2]वचांसि भृङ्गैः ।
लज्जान्वितं सविनयं हृदयं क्षणेन
[3]पर्याकुलं कुलगृहेऽपि कृतं वधूनाम् ॥ २१ ॥

पुंस्कोकिलैरिति । उपात्तहर्षैः प्रहृष्टैः । पुंस्कोकिलैः परभृतैः । कलवचोभिः अव्यक्तमधुरशब्दैः । तथा उन्मदकलानि उन्मदेन उद्गतमदेन कलानि मधु-राणि । वचांसि । कूजद्भिः । भृङ्गैः भ्रमरैः । लज्जान्वितं लज्जया त्रपया अन्वितं युक्तं । सविनयं विनयेन सहितं युक्तं । वधूनां नवोढानां ‘ वधूः स्त्री शारिवौषधौ । स्नुषा शठी नवोढासु ’ इति मेदिनी । हृदयं कुलगृहेऽपि कुलमर्यादापालकगृहेऽपि । शाकपार्थिवादित्वात्समासः कुलस्त्रीतिवत् । क्षणेन पर्याकुलं व्याकुलं । कृतम् ॥ २१ ॥

आकम्पयन्[4]कुसुमिताः सहकारशाखा
विस्तारयन्पर[5]भृतस्य वचांसि दिक्षु ।
वायुर्विवाति हृदयानि हरन्[6]नराणां
नीहारपातविगमात्[7]सुभगो [8]वसन्ते ॥ २२ ॥

आकम्पयन्निति । वसन्ते । नीहारपातविगमात् । नीहारपातस्य तुहिनपातस्य विगमात् अपगमात् । सुभगः सुन्दरः । वायुः । कुसुमिताः संजातकुसुमाः । सह-

१ कलरवैः समुपात्तहर्षैः । २ विलोचनानि । वचांसि धीरम् । उन्मदकराणि वचांसि पुंसाम् । ३ पर्याकुले । ४ कुसुमितां सहकारशाखाम् । ५ परभृतोऽय । ६ वधूनाम् । ७ विमलो । ८ वनेषु ।

कारशाखाः आम्रशाखाः । आकम्पयन् । दिक्षु । परभृतस्य कोकिलस्य । जातावेकवचनम् । वचांसि । विस्तारयन् । नराणां हृदयानि च हरन् आकर्षयन् सन् । विवाति विशेषेण वाति गच्छति ॥ २२ ॥

कुन्दैः सविभ्रमवधूहसितावदातै-
रुद्द्योतितान्युपवनानि मनोहराणि ।
चित्तं मुनेरपि हरन्ति निवृत्तरागं
प्रागेव रागमलिनानि मनांसि यूनाम् ॥ २३ ॥

कुन्दैरिति । **सविभ्रमवधूहसितावदातैः** सविभ्रमाणि सविलासानि यानि वधूहसितानि कामिनीहास्यानि तानीव अवदातानि सितानि तैः । **कुन्दैः** कुन्दपुष्पैः । कुन्दानां माध्यत्वाच्चिन्त्यमेतत् । उद्द्योतितानि भूषितानि । **मनोहराणि । उपवनानि** कृत्रिमवनानि । **मुनेः** तापसस्य **निवृत्तरागमपि** निवृत्तः रागः अनुरागः यस्मात्तादृशमपि **चित्तं** । **हरन्ति । रागमलिनानि** अनुरागदूषितानि । **यूनां मनांसि । प्रागेव** हरन्तीति किमु वक्तव्यमिति भावः । प्रागेवेति किमुतत्यस्मिन्नर्थे बौद्धग्रन्थे बहुशः प्रयुज्यते । एवमाद्या महात्मानः विषयान् गर्हितानपि । रतिहेतोर्बुभुजिरे प्रागेव गुणसंहितान् । बुद्धचरिते स० ४ श्लो० ८१ ॥ २३ ॥

आलम्बिहेमरसनाः स्तनसक्तहाराः
कंदर्पदर्पशिथिलीकृतगात्रयष्टयः ।
मासे मधौ मधुरकोकिलभृङ्गनादै-
र्नार्यो हरन्ति हृदयं प्रसभं नराणाम् ॥ २४ ॥

आलम्बिहेमरसना इति। **आलम्बिहेमरसनाः** आलम्बिन्यः लम्बमानाः हेमरसनाः कनकमेखला यासां ताः । **स्तनसक्तहाराः** स्तनेषु सक्ता आसक्ता हारा यासां ताः । **कंदर्पदर्पशिथिलीकृतगात्रयष्टयः** । कंदर्पदर्पेण मदनोष्मणा शिथिलीकृताः गात्र-

१ संशोभितानि । २ निरस्त । ३ प्रायेण रागचलितानि । प्रागेव रागमखिलानि । ४ पुसाम् । ५ प्रालम्बि । आलम्ब्य चन्दनरसान् । आलब्धचन्दनरसाः । ६ लग्न । ७ कोमल । ८ रावैः । ९ रामाः ।

यष्टयो यासां ताः। अथ वा कंदर्पदर्पः मदनाभिमानः शिथिलीकृतो याभिस्तादृश्यो गात्रयष्टयो यासां ताः । वाहिताग्न्यादित्वात्परनिपातः। **नार्यः**। **मधौ मासे** चैत्रे मासि । **मधुरकोकिलभृङ्गनादैः** । मधुरैः कोकिलानां भृङ्गाणां च नादैः शब्दैः सह **नराणां हृदयं**। प्रसभं बलात्कारेण **हरन्ति** । शब्दैः मधुराः कोकिलभृङ्ग-शब्दाः यथा बलात्कारेण नराणां हृदयं हरन्ति तथा नार्योऽपीति भावः । सहोक्तिरलंकारः ॥ २४ ॥

नानामनोज्ञकुसुमद्रुमभूषितान्ता-
न्हृष्टान्यपुष्टनिनदाकुलसानुदेशान् ।
शैलेयजालपरिणद्धशिलातलान्ता-
न्दृष्ट्वा जनः क्षितिभृतो मुदमेति सर्वः ॥ २५ ॥

नानेति। **सर्वः** । **जनः** सर्वनाम्नां बुद्धिस्थपरामर्शकत्वात् अवियुक्तो जन इत्यर्थः । **नानामनोज्ञकुसुमद्रुमभूषितान्तान्** नाना अनेकप्रकारा ये कुसुम-युक्ता द्रुमास्तैर्भूषिता अन्तः पर्यन्तभागा येषां तान्। **हृष्टान्यपुष्टनिनदाकुलसानु-देशान्** हृष्टाः प्रमुदिता ये अन्यपुष्टाः परभृताः तेषां निनदै रवैः आकुलाः सानुदेशाः शिखरप्रदेशा येषां तान्। **शैलेयजालपरिणद्धशिलातलान्तान्** शिलायां भवं शैलयं अश्मपुष्पं तस्य जालेन समूहेन परिणद्धाः व्याप्ताः शिलातलान्ताः येषां तान् । **क्षितिभृतः** । शैलान् । **दृष्ट्वा** । **मुदं** हर्षं । **एति** प्राप्नोति ॥ २५ ॥

नेत्रे निमीलयति रोदिति याति शोकं
घ्राणं करेण विरुणद्धि विरौति चोच्चैः ।
कान्तावियोगपरिखेदितचित्तवृत्ति-
र्दृष्ट्वाऽध्वगः कुसुमितान्सहकारवृक्षान् ॥ २६ ॥

---

१ भूषिताग्रान् । पुष्पिताग्रान् । भूषिताङ्गान् । कुसुमोद्गमपुष्पितान्तान् । २ कुलशोभितसा-नुदेशान् । ३ जानु । ४ तलौघान् । तलांश्च । गुहान्तान् । ५ समुपैति सर्वान् । मदमेति । ६ निमीलति । विरोदिति । ७ यातिमोहम् । जातमोहान् । ८ घ्राणान् । घ्राणं करेण च निहत्य । ९ परिदेवित । १० नरः । जनः । नगे । ११ कुसुमिताः सहकारशाखाः । कुसुमितान् । सहसैव चूतान् ।

नेत्रे इति । कान्तावियोगपरिखेदितचित्तवृत्तिः । कान्तावियोगेन कान्ताविरहेण परितः खेदिता चित्तवृत्तिः यस्य सः । अध्वगः । अध्वानं गच्छतीत्यध्वगः पान्थः । कुसुमितान् । सहकारवृक्षान् । दृष्ट्वा । तद्दर्शनस्य संतापजनकत्वात् नेत्रे निमीलयति । रोदिति शोकं याति । करेण घ्राणं नासिकां । विरुणद्धि । उच्चैः । विरौति च अर्थः सुगमः ॥ २६ ॥

समदमधुकराणां कोकिलानां च नादैः
कुसुमितसहकारैः कर्णिकारैश्च रम्यः[1] ।
इषुभिरिव सुतीक्ष्णैर्मानसं मानिनीनां[2]
तुदति कुसुममासो[3] मन्मथोद्दीपनाय[4] ॥ २७ ॥

समदेति । रम्यः रमणीयः । कुसुममासः मधुमासः । समदमधुकराणां समदा मदसहिता ये मधुकरा भृङ्गास्तेषां । च परं । कोकिलानां नादैः शब्दैः । कुसुमितसहकारैः कुसुमिताः संजातकुसुमा ये सहकारास्तैः । च परं कर्णिकारैः द्रुमोत्पलवृक्षैः। सुतीक्ष्णैः निशितैः इषुभिरिव मानिनीनां मानवतीनां मानसं हृदयं । मन्मथोद्दीपनाय तुदति व्यथयतीत्यर्थ ॥ २७ ॥

आम्री मञ्जुलमञ्जरी वरशरः सत्किंशुकं यद्धनु-
र्ज्या यस्यालिकुलं कलङ्करहितं छत्रं सितांशुः सितम् ।
मत्तेभो मलयानिलः परभृता यद्बन्दिनो लोकजि-
त्सोऽयं वो वितरीतरीतु वितनुर्भद्रं वसन्तान्वितः ॥ २८ ॥

आम्रीति । यस्य वरशरः श्रेष्ठबाणः आम्री आम्रस्येयम् तस्येदमित्यण् । टिड्ढाणेति ङीप् । मञ्जुलमञ्जरी मञ्जुला मनोज्ञा चासौ मञ्जरी च । यद्धनुः । सत्किंशुकम् सत् शोभनं किंशुकं किंशुकपुष्पम् । यस्य । ज्या मौर्वी । अलिकुलं भ्रमरसमूहः । कलङ्करहितं निष्कलङ्कं । सितं छत्रं । सितांशुः । सिताः शुभ्रा अंशवः किरणा यस्य सः चन्द्र इत्यर्थः । यस्य मत्तेभः मत्तवारणः ।

---

१ रम्यैः । २ कामिनीनाम् । ३ कुसुमबाणो । कुसुमचापो । ४ मन्मथोद्वेजनाय । मन्मथोत्तेजनाभिः ।

मलयानिलः । यद्बन्दिनः । यस्य बन्दिनः परभृताः कोकिलाः । सोऽयम् । वसन्तान्वितः वसन्तेन अन्वितः युक्तः । लोकजित् । लोकान् जनान् जयति सः । वितनुः विगता नष्टा तनुर्यस्य सः । मदन इत्यर्थः । वः युष्माकं । भद्रं कल्याणं । वितरीतरीतु । पुनः पुनः अतिशयेन वा वितरतु ददातु । तरतेर्यङ्लुगन्ताल्लोट् । अत्र काव्ये सर्गान्ते तत्तदृत्वाशीर्वचनश्लोकसत्त्वेऽप्यस्मिन्सर्गे मदनान्वितऋत्वाशीर्वचनं उभयोस्तादात्म्यं स्वसंमतामिति सूचनार्थम् । अत एव अस्य सर्गस्य प्रथमश्लोके मदनोपकारणान्येव ऋतूपकरणत्वेन वर्णितानीति ज्ञेयम् ॥ २८ ॥

इति बालबोधिनीटीकासहितस्य ऋतुसंहारकाव्यस्य
वसन्तवर्णनं नाम षष्ठः सर्गः ॥

प्रक्षिप्तश्लोकाः ।

CANTO II. AFTER 18TH

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्रयन्ति ।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवङ्गाः ॥ १ ॥

वहन्तीति । नद्यः वहन्ति । घनाः मेघाः वर्षन्ति । मत्तगजाः नदन्ति । वनान्ताः भान्ति रोचन्ते । प्रियाविहीनाः ध्यायन्ति । स्वप्रियाध्यानं कुर्वन्तीत्यर्थः। शिखिनः नृत्यन्ति । प्लवङ्गाः कपयः । समाश्रयन्ति निकुञ्जानिति शेषः । गिरिगह्वराणीति वा । एवं यथासङ्ख्यं क्रियापदानां कर्तृपदैः संबन्धः ॥ १ ॥

CANTO III. AFTER 22ND

करकमलमनोज्ञाः कान्तसंसक्तहस्ता
वदनविजितचन्द्राः काश्चिदन्यास्तरुण्यः ।
चिंतकुसुमसुगन्धि प्रायशो[2] यान्ति वेश्म
प्रबलमदनहेतो[3]स्त्यक्तसंगीतरागाः ॥ २ ॥

करेति । मनोज्ञानि करकमलानि यासां ताः । करकमलमनोज्ञाः । आहिताग्न्यादित्वात्परनिपातः । कान्तैः संसक्ताः संश्लिष्टाः हस्ताः यासां ताः कान्तसंसक्तहस्ताः । वदनेन विजितश्चन्द्रो याभिस्ताः वदनविजितचन्द्राः । प्रबलमदनहेतोः प्रबलमदनकारणात् । त्यक्तः संगीते गीतवाद्यनृत्येषु रागः अ-

---

१ रचितकुसुमगन्धि । २ प्राविशन्तीव । ३ हेतौ सूक्तसङ्गोक्तरम्या ।

नुरागः याभिः ताः त्यक्तसंगीतरागाः । काश्चित् अन्याः तरुण्यः । चितैः कुसुमैः सुगन्धि चितकुसुमसुगन्धि । वेश्म गृहम् । शयनगृहमिति यावत् । प्रायशः बाहुल्येन यान्ति ॥ २ ॥

सुरतरसविला[1]साः सत्सखीभिः समेता
असमश[2]रविनोदं सूचयन्ति[3] प्रकामम् ।
अनुप[4]ममुखरागा रात्रिम[5]ध्ये विनोदं
शरदि तरुणकान्ताः सूचयन्ति प्रमोदा[6]त् ॥ ३ ॥

सुरतेति । शरदि । सुरतरसस्य सुरतानुरागस्य विलासाः यासां ताः सुरतरसविलासाः । तरुण्यश्च ताः कान्ताः च तरुणकान्ताः । सतीभिः साध्वीभिः सखीभिः सत्सखीभिः समेताः युक्ताः सत्यः । असमशरविनोदं मदनव्यापारम् । विनोदशब्दस्य व्यापारार्थकत्वम् । 'निर्विनोदां सखीं ते' इत्युत्तरमेघव्याख्याने 'निर्विनोदां निर्व्यापाराम्' इति मल्लिनाथः । प्रकामं पर्याप्तं यथा तथा सूचयन्ति । अनुपमः निरुपमः मुखरागः मुखकान्तिर्यासां ताः अनुपममुखरागाः । प्रमोदात् हर्षात् । रात्रिमध्ये रात्रौ विनोदं मदनव्यापारं च सूचयन्ति ॥ ३ ॥

CANTO IV. AFTER 9TH

मार्गं समीक्ष्यातिनिरस्तनीरं
प्रवासखिन्नं पतिमुद्वहन्त्यः ।
अवेक्ष्यमाणा हरिणेक्षणाक्ष्यः
प्रबोधयन्तीव मनोरथानि ॥ ४ ॥

मार्गमिति । अतिशयेन निरस्तं नष्टं नीरं यस्मात्तं अतिनिरस्तनीरं मार्गं समीक्ष्य । प्रवासखिन्नं प्रवासक्लिष्टं पतिं उद्वहन्त्यः । एतावत्कालं एतादृक्क्लेशोऽ

---

१ रुचिवि०--विलासात् । २ रस । ३ यन्त्यप्र । ४ अनुमतमुखराभिः । ५ श्रोणिमध्ये ६ प्रमोदान् ।

नुभूतः स्यात् इति मनसि भावयन्त्यः । हरिणेक्षणे इव अक्षिणी यासां ताः हरिणेक्षणाक्ष्यः । सप्तम्युपमाने इत्युत्तरपदलोपाभावश्चिन्त्यः । अवेक्ष्यमाणाः सत्यः मनोरथानि । नपुंसकत्वं चिन्त्यम् । प्रबोधयन्तीव ज्ञापयन्तीव ॥ ४ ॥

CANTO VI. AFTER 2ND

ईषत्तुषारैः कृतशीतहर्म्यै
सुवासितं चारु शिरश्च चम्पकैः ।
कुर्वन्ति नार्योऽपि वसन्तकाले
स्तनं सहारं कुसुमैर्मनोहरैः ॥ ५ ॥

ईषदिति । वसन्तकाले । तुषारैः जलबिन्दुभिः ईषत् मनाक् कृतशीतहर्म्यै कृतं शीतं यस्मिन् तस्मिन् हर्म्यै धनिकगृहे । नार्यः अपि चारु शिरः चम्पकैः सुवासितं कुर्वन्ति । स्तनं । जातावेकवचनम् । मनोहरैः कुसुमैः सहारं च कुर्वन्ति ॥ ५ ॥

CANTO VI. AFTER 9TH

छायां जनः समभिवाञ्छति[1] पादपानां
नक्तं[2] तथेच्छति पुनः किरणं सुधांशोः ।
हर्म्यं[3] प्रयाति शयितुं सुखशीतलं च
कान्तां[4] च गाढमुपगूहति शीतलत्वात् ॥ ६ ॥

छायामिति । जनः पादपानां वृक्षाणां छायां समभिवाञ्छति इच्छति । दिवा इति शेषः । तथा पुनः नक्तं रात्रौ सुधांशोः चन्द्रस्य किरणं इच्छति । सुखं च शीतलं च सुखशीतलं हर्म्यं च । सुखशीतलता हि चन्दनोदकसेचनात् । शयितुं स्वप्तुं प्रयाति । कान्तां च शीतलत्वात् गाढं उपगूहति आलिङ्गति ॥ ६ ॥

---

१ समधिकांक्षति । २ मत्तः सचेत्पुनरयं किरणांश्च भानोः । ३ कान्तासुगात्रमुपगूहति शीतलत्वात् । ४ हर्म्येषु याति च रतिं निशि शीतलेषु ।

CANTO VI. AFTER 27TH.

रुचिरकनककान्तीन्मुञ्चतः पुष्पराशी-
न्मृदुपवनविधूतान्पुष्पितांश्चूतवृक्षान् ।
अभिमुखमभिवीक्ष्य क्षामदेहोऽपि मार्गे
मदनशरनिघातैर्मोहमेति प्रवासी ॥ ७ ॥

रुचिरेति । रुचिरकनकस्य कान्तिरिव कान्तिर्येषां तान् रुचिरकनककान्तीन् पुष्पराशीन् पुष्पसमूहान् मुञ्चतः । मृदुपवनविधूतान् मन्दानिलाकुलितान् पुष्पितान् संजातपुष्पान् च चूतवृक्षान् आम्रवृक्षान् मार्गे अभिमुखं संमुखं अभिवीक्ष्य दृष्ट्वा । क्षामदेहोऽपि कृशतनुरपि प्रवासी पान्थः । मदनशरनिघातैः कामबाणताडनैः मोहं एति ॥ ७ ॥

परभृतकलगीतैर्ह्लादिभिः सद्वचांसि
स्मितदशनमयूखान्कुन्दपुष्पप्रभाभिः ।
करकिसलयकान्तिं पल्लवैर्विद्रुमाभै-
रुपहसति वसन्तः कामिनीनामिदानीम् ॥ ८ ॥

परभृतेति । इदानीं वसन्तः । कामिनीनाम् । इदं प्रतिवाक्यं सबध्यते । सद्वचांसि मधुरभाषणानि ह्लादिभिः आनन्दजनकैः परभृतकलगीतैः कोकिलानां अव्यक्तमधुरशब्दैः । 'गीतं शब्दितगानयोः' इति मेदिनी । कामिनीनां स्मितदशनमयूखान् स्मितजन्यदशनकिरणान् कुन्दपुष्पप्रभाभिः कुन्दपुष्पकान्तिभिः । कामिनीनां करकिसलयकान्तिं च विद्रुमाभैः प्रवालकान्तिभिः पल्लवैः उपहसति ॥ ८ ॥

कनककमलकान्तैराननैः पाण्डुगण्डै-
रुपरिनिहितहारैश्चन्दनार्द्रैः स्तनान्तैः ।

---

१ कान्तं...पुष्पवृन्दं । २ सुविद्धः । ३ मयूखं । ४ अभिभवति । ५ उपनिहितमुहारैः । ६ स्तनाग्रैः ।

मदजनितविलासैर्दृष्टिपातैर्मुनीन्द्रा-
न्स्तनभरनतनार्यः कामयन्ति प्रशान्तान् ॥ ९ ॥

कनकेति । कनककमलकान्तैः पाण्डुगण्डैः आननैः मुखैः । उपरि निहिताः स्थापिताः हाराः येषां तैः उपरिनिहितहारैः चन्दनार्द्रैः चन्दनरसक्लिन्नैः । स्तनान्तैः स्तनप्रान्तैः । मदेन जनिताः विलासाः येषु तैः मदजनितविलासैः दृष्टिपातैः कटाक्षैश्च स्तनभरनतनार्यः प्रशान्तान् प्रशान्तेन्द्रियान् मुनीन्द्रान् मुनिश्रेष्ठान् । अपिर्गम्यः । कामयन्ति सकामं कुर्वन्ति । किमुतान्यं प्राकृतं जनमित्यर्थः ॥ ९ ॥

मधुसुरभि मुखाब्जं लोचने लोध्रताम्रे[2]
नवकुरबकपूर्णः केशपाशो मनोज्ञः ।
गुरुतर[3]कुचयुग्मं श्रोणिबिम्बं तथैव
न भवति किमिदानीं योषितां मन्मथाय ॥ १० ॥

मध्विति । मधुसुरभि मद्येन सुगन्धि मुखाब्जं मुखकमलम् । लोध्रताम्रे लोध्रपुष्पे इव ताम्रे रक्ते लोचने नेत्रे । नवकुरबकपूर्णः नूतनकुरबकपुष्पपूर्णः मनोज्ञः रुचिरः केशपाशः केशकलापः । गुरुतरकुचयुग्मं अतिपृथुकुचयुगलं । तथा एव श्रोणिबिम्बं । इदानीं वसन्तकाले योषितां संबन्धि किम् मन्मथाय न भवति मदनोद्दीपकं न स्यात् । सर्वमेव स्यादिति भावः ॥ १० ॥

आकम्पितानि हृदयानि मनस्विनीनां
वातैः प्रफुल्लसहकारकृताधिवासैः ।
[4]उत्कूजितैः परभृतस्य मदाकुलस्य
श्रोत्रप्रियैर्मधुकरस्य च गीतनादैः[5] ॥ ११ ॥

आकम्पितानीति । मनस्विनीनाम् । 'अत्र वियोगिनीनां' इति पदं कविविवक्षितमिति प्रतिभाति । हृदयानि चेतांसि । प्रफुल्लसहकारेण कृतः अधिवासः

---

१ मदनजनितलासैः सालसैर्दृष्टिपातैः मुनिवरमपि नार्यः कामयन्ते वसन्ते । २ लोलतारे । ३अतिगुरु । ४ संबाधितम् । ५ शब्दैः ।

गन्धसंस्कारः येषां तैः प्रफुल्लसहकारकृताधिवासैः वातैः पवनैः मदाकुलस्य मदोन्मत्तस्य परभृतस्य कोकिलस्य उत्कूजितैः उत्कूजनैः। मधुकरस्य भ्रमरस्य श्रोत्रप्रियैः कर्णमधुरैः गीतनादैः शब्दध्वनिभिः च गुञ्जारवैरिति यावत्। आकम्पितानि ॥ ११ ॥

रम्यः[1] प्रदोषसमयः स्फुटचन्द्रभासः
पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः।
मत्तालियूथविरुतं निशि सीधुपानं
सर्वं रसायनमिदं[2] कुसुमायुधस्य ॥ १२ ॥

रम्य इति। रम्यः रमणीयः प्रदोषसमयः दिनान्तकालः। स्फुटाः व्यक्ताः चन्द्रभासः चन्द्रकिरणाः स्फुटचन्द्रभासः। 'भाः प्रभावे मयूखे स्त्री' इति मेदिनी। पुंस्कोकिलस्य विरुतं शब्दः। सुगन्धिः पवनः। कुसुमरसेन मत्तानां अलियूथानां षट्पदसंघानां विरुतं मत्तालियूथविरुतं। निशि सीधुपानं मद्यपानं। इदं सर्वम् कुसुमायुधस्य मदनस्य रसायनं जराव्याधिनाशकमौषधम्। 'रसायनं...जराव्याधिजिदौषधं' इति मेदिनी ॥ १२ ॥

रक्ताशोकविकल्पिताधरमधुर्मत्तद्विरेफस्वनः[3]
कुन्दापीडविशुद्धदन्तनिकरः प्रोत्फुल्लपद्माननः।
चूतामोदसुगन्धिमन्दपवनः शृङ्गारदीक्षागुरुः
कल्पान्तं मदनप्रियो दिशतु वः पुष्पागमो मङ्गलम्॥१३॥

रक्तेति। रक्ताशोकेन विकल्पितं अनुमापितं अधरमधु अधरमाधुर्यं। अधरः शोभामिति भावः। येन सः रक्ताशोकविकल्पिताधरमधुः। मत्तद्विरेफस्वन एव। स्वनः शब्दः यस्यः स मत्तद्विरेफस्वनः। द्विरेफशब्देन लक्षणया द्विरेफरवग्राह्यः। कुन्दापीडः कुन्दभूषणमेव विशुद्धः निर्मलः दन्तनिकरः दन्तसमूहः यस्य स कुन्दापीडविशुद्धदन्तनिकरः। प्रोत्फुल्लं पद्ममेवाननं यस्य सः। प्रोत्फुल्लपद्माननः। चूतामोदः आम्रमञ्जरीसुगन्धः मन्दपवनः मन्दनिःश्वासमारुतः यस्य सः चूतामोदसुगन्धिमन्दपवनः। शृङ्गारदीक्षायां शृङ्गारोपदेशे

१ रम्यप्र। २ हि साधनमिदं। ३ नीला।

गुरुः शृङ्गारदीक्षागुरुः । मदनप्रियः पुष्पागमः वसन्तः वः युष्माकं मङ्गलं कल्याणं कल्पान्तं । सर्वदेत्यर्थः । दिशतु वितरतु ॥ १३ ॥

मलयपवनविद्धः कोकिलालापरम्यः
[२]सुरभिमधुनिषेकाल्लब्धगन्धप्रबन्धः ।
विविधमधुपयूथैर्वेष्ट्यमानः[३] समन्ता-
द्भवतु तव वसन्तः श्रेष्ठकालः सुखाय ॥ १४ ॥

मलयेति । मलयपवनविद्धः मलयपवनेन मलयानिलेन विद्धः संपृक्तः । तद्युक्त इति यावत् । कोकिलालापरम्यः कोकिलशब्दैः रमणीयः । सुरभिमधुनिषेकात् सुरभिणः मधुनः निषेकात् सेचनात् । लब्धः गन्धप्रबन्धः गन्धसंबन्धः येन सः लब्धगन्धप्रबन्धः । विविधमधुपयूथैः बहुविधभ्रमरसमूहैः समन्तात् सर्वतः वेष्ट्यमानः व्याप्तः च श्रेष्ठकालः वसन्तः तव सुखाय भवतु । त्वां सुखिनं करोत्वित्यर्थः ॥ १४ ॥

नागाग्निवसुभूशाके (१८३८) वेङ्कटाचार्यसूरिणा ।
ज्येष्ठशुक्लस्य सप्तम्यां गुरौ टीका समापिता ॥

---

१ लेनाभिरम्यः । २ मधुसुरभिसुत्रषैर्नद्ध । ३ वीक्ष्यमाणः । ४ काल एषोऽद्यभूत्यै ।

ऋतुसंहारस्थ पद्यानुक्रमणी।

TRANSLATION

OF

RITUSAMHARA.

CANTO I.

1. Here has approached, dear, this hot season, when the sun is (hot and) fierce, the moon becomes (pleasant and) desirable, one can be continually bathing in the ample waters, the evenings are delightful, (and) the feeling of love is (comparatively) allayed.

2. Nights wherein the masses of darkness are dispelled by the moon, in some places a wonderful house with a water-fountain, various kinds of jewels, and juicy sandalwood-paste,—in summer, dear, people (especially) resort to the use of these.

3. Charming mansion-terraces nicely redolent of perfumes, wine rippling with the breath of the mouths of sweethearts, music on a well-strung instrument,—(each) inflaming passion,—the amorous enjoy these at nights in summer.

4. Women allay the heat felt by (their) lovers, by (their) round hips having (covering) silk-cloths and waist-bands, by (their) breasts having garlands and (other)

ornaments, and smeared with sandal-paste, (and) by (their) hair fragrant with the cosmetics used in bathing.

5. Peoples' hearts are kindled with passion by women's feet fully dyed with the colour of the lac-resin, having anklets on, (and therefore) imitating at every step the cry of the swan.

6. Breasts smeared with thick sandal-paste (and) having at their tops snow-white (flower-) wreaths, and hips with girdles of gold,—whose mind is not made to yearn (with love) by these ?

7. Now youthful ladies of lofty breasts, the joints of their limbs being full of perspiration appearing (in profusion), throw off (their) heavy garments and put a thin cloth over their breasts.

8. To-day (sleeping) Love is being awakened, like a sleeping (lover), by the breezes produced by fans wet with water mixed with sandal-paste, by the placing of round breasts having strings of necklaces, (and) by the hum of the music of *vallakî* and *kâkali* lutes.

9. At seeing, for long, during nights women's faces, happily sleeping, in white mansions, the moon, (who was) greatly desirous (of seeing them), surely becomes pale at the end of nights with shame as it were.

10. Travellers, whose hearts are scorched by the fire of separation from their sweethearts, cannot even look at the earth, wherein columns of dust are raised by unbearable gusts (of wind), (and) which is heated by the blaze of the fierce sun.

11. Exceedingly scorched by the fierce sunshine, (and) their palates dried up by great thirst, the beasts have

started off to another forest, seeing (in that direction) the sky appearing (black) like powdered collyrium, and thinking it to be water.

12. Like evenings with the beautiful ornament of the moon, women, *having ornaments beautiful like the moon*, quickly kindle love in the hearts of travellers, by means of their sportive and laughing side-glances.

13. Being greatly scorched by the rays of the sun and parched in the way by the hot dust, a snake with its mouth turned downwards (and) moving tortuously, is lying under (the shadow of) a peacock, taking rapid breath.

14. Leaving off his mighty efforts on account of great thirst, (and) panting repeatedly with his jaws wide agape, the lord of beasts (lion), with his tongue lolling and) the ends of his mane quivering, does not kill elephants, though (they are) not far (from him).

15. Parched by the rays of the sun and moist foam coming out of their dried mouths, elephants, suffering from great thirst, (and) seeking water, are not afraid even of the lion.

16. Being exhausted physically and mentally by the rays of the sun resembling fire to which oblations have been offered, peacocks do not kill serpents, (although) they are near, which have thrust their necks (for shelter) in the circles on their tails.

17. Greatly scorched by the rays of the sun, a herd of wild boars are as it were entering the earth, digging by means of rows of (their) long-stretching snouts a pond wherein the mud has dried up and (only) the *bhadra-musta* grass remains.

18. Scorched by the sun with its fierce rays, the frog leaps up from the pond whose water is muddy, and sits under (the shadow of) the umbrella-like hood of a thirsty snake.

19. Elephants herded so as to jostle against one another have made the lake one from which all the mass of lotus-roots is torn up, in which the fish are dead, from which all swans have fled away in fear, (and) which is full of thick mud owing to (their) trampling.

20. The lustre of its head-gem being made (more) manifest by the glare of the sun, (and) inhaling wind by means of its lolling forked tongue, the thirsty snake does not kill the numberless frogs although) it is tormented by the blaze of the sun and by the fire of (its own) poison.

21. With (their) hollow, foaming mouths covered with saliva, and (their) reddish tongues protruding, a thirsty herd of (wild) female buffaloes have come out of the mountain-cavern, with upraised heads, in search of water.

22. The forest-regions when looked at make one very apprehensive, the shoots of corn (in them) being dried up by the burning of a very fierce conflagration, the sear leaves being carried aloft by the swift, violent winds, (and) the water on all sides being diminished by the heat of the sun.

23. All birds are panting, sitting on trees whose leaves have fallen off ; troops of fatigued monkeys are resorting to mountain-caverns ; herds of oxen are wandering in every direction, looking for water; and a covey of *s'arabhas* is straightway taking up water from a well.

24. Everywhere the grounds have been burnt by the wild fire, brilliant as a full-blown fresh *kusumbha* flower or as the shining *sindûra* dye, whose speed is quickly increased by that of the strong wind, (and which is) busy in singeing the ends of creepers and tree-twigs.

25. The conflagration, starting on the skirts (of woodland), torments all beasts; increasing with the wind it burns in the mountain valleys; it breaks forth with sharp noises in places (abounding) with dry bamboos; growing strong in a moment it spreads in the grass.

26. Fire, being spread by the wind, (and) becoming too much as it were in the groves of *s'âlmalis*, is shining with a golden-yellow lustre in the hollows of trees; (and), leaping on lofty trees the leaves on whose branches have ripened (and therefore fallen off), it is travelling in all, directions in the forest-regions.

27. Elephants, oxen and lions, their bodies scorched by fire, have flocked together like friends, giving up hostility; and, quickly emerging from the grass where they were tormented by fire, they rest by a river with broad, sandy banks.

28. In which the waters are covered with beds of lotuses, which is delightful with the aroma of *pâtala* flowers, when bathing is pleasurable, when moonlight and pearl-strings are enjoyable,—may (such) a summer pass for you, in happiness and with lovely women, at nights on tops of houses where beautiful music is (being heard).

End of Canto I., styled
'A Description of Summer'.

CANTO II.

1. The rainy season has come, dear, like a king, having the clouds with watery spray in the place of rutty elephants (*having rutty elephants like the clouds pouring water*), the flashes of lightning serving as flags (*having flags like lightning*), the rumble of thunder as the beat of drums (*whose beat of drums resembles the rumble of thunder*), shedding brilliance (all around), (and) beloved of the amorous (*liked by the needy*).

2. On all sides the sky has been overcast with clouds having the lustre of the leaves of very blue lotuses, in some places resembling heaps of powdered collyrium, in others appearing like the breasts of a woman quick with child.

3. Being asked (water) by the flocks of thirsty *châtaka* birds, and hanging (low) with (their) watery burden, clouds, (about) to pour down in large streams, are slowly moving on, making a noise pleasant to the ear.

4. And clouds, having the rumble of thunder to serve as the beat of drums, (and) wielding Indra's bow having lightning for its string, are violently paining the minds of travellers by their keen arrows in the form of the fall of the very sharp showers.

5. Being full of shoots of grass resembling splintered cat's-eye gems, of leaves of *kandalî* plants rising (up from the ground), (and) of the *indragopaka* insects, the earth appears like a beautiful lady, decked with jewels other than white.

6. A flock of peacocks, always singing beautifully, has to-day started dancing, longing for (this) festive occasion, lovely with its broad plumage spread out, (and) busy in flurried embraces and kisses.

7. Felling everywhere the trees on the banks by their turbid waters (rushing) with great speed, rivers are impetuously running to the sea, like very bad women mentally flurried by passion.

8. The forests on the Vindhyas enchain the mind, decked (as they are) with trees bearing (new) foliage, and full of numerous kinds of dark-green grass which have put forth tender shoots, (and) which are browsed by the mouths of female deer.

9. The sandy forest-ground makes the heart full of longing, being full everywhere of frightened deer, whose heads are rendered beautiful by their tremulous, lotus-like eyes.

10. Even on nights made pitchy dark by clouds thundering loudly and ever, the *abhisârikâ* women, under the influence of love, are going (to meet their lovers), the ground on their way being shown (to them) by flashes of lightning.

11. Very much frightened in their minds by lightning and the clouds thundering fiercely and deeply, women closely embrace in sleep their lovers, although they have (before) bahaved themselves badly.

12. The wives of people who are away from home are in despair, sprinkling, with the drops of water from their lotus-like eyes, their *bimba*-like lower lips resembling

beautiful (new and tender) leaves (of trees), (and) leaving off (the use of) garlands, ornaments, and cosmetics

13. The new water is running down to a low level, greyish (in colour), full of vermin, dust and grass, moving in a zig-zag path like a snake, (and) viewed (thus) by affrighted broods of frogs.

14. Bees, whose hum is delightful to the ear, abandon a lotus-plant from which leaves and flowers have dropped off, and in their anxiety foolishly alight on the circles in the plumage of dancing peacocks, hoping (to find) new lotuses there.

15. Wild elephants who, furious at the thunder of new clouds, are repeatedly trampeting, have their temples, shining like clean lotuses, covered with the juicy rut accompanied by swarms of bees.

16. Their rocks being touched by clouds bright like white lotuses, mountains covered all around with water-falls (and) full of dancing peacocks create anxiety (in the beholder).

17. Shaking the groves of the *kadamba*, *sarja*, *arjuna* and *ketakî* trees, bearing the fragrance of their blos-soms, (and) cool with the contact of clouds full of watery spray,—whom does the breeze not make love-sick ?

18. By the hair hanging down over their broad hips, by fragrant flowers made up into ear-ornaments, by breasts on which garlands are worn, (and) by mouths with wine (in them), women inflame love in (their) lovers.

